Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

13225
Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

ISSN 2230-896

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदविद्या
VEDAVIDYĀ

मूल्याङ्कित अन्ताराष्ट्रिय शोध-पत्रिका

An International Refereed Research Journa

अङ्क : २०
Vol.: 20

जुलाई-दिसम्बर २०
July-December 201

Vol. 21
2013
JAN-JUN

सम्पादक

प्रो. रूप किशोर शास्त्री

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् उज्जयिनी

(मानवसंसाधनविकासमन्त्रालय भारतसर्वकारस्याधीनम्)

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ISSN 2230-8962

वेदविद्या

VEDA-VIDYĀ

Library
Gurukul Kangri Vishwavidyalaya
Haridwar

मूल्याङ्कित-अन्ताराष्ट्रिय-शोध-पत्रिका
An International Refereed Research Journal

जुलाई-दिसम्बर २०१२
July-December 2012

पुस्तकालय
132252
गुरुकुल कांगडी विश्वविद्यालय

सम्पादक
प्रो. रूप किशोर शास्त्री
(सचिव)

महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान
(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)
वेदविद्या मार्ग, चिन्तामण गणेश, पो.ऑ. - जवासिया, उज्जैन (म.प्र.) 456006

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संरक्षक
माननीय श्री पल्लम राजू
(अध्यक्ष, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान, तथा
मानव संसाधन विकास मन्त्री, भारत सरकार)

सम्मान्य परामर्शदातृ-मण्डल
प्रो. एस. सुदर्शन शर्मा
(उपाध्यक्ष, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान)

प्रो. श्रीनिवास रथ
(पूर्व उपाध्यक्ष, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान)

आचार्य विजयराघवन्,
(निदेशक, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान)

सम्पादक
प्रो. रूप किशोर शास्त्री
(सचिव, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान)

सहसम्पादक
डॉ. देवानन्द शुक्ल (कार्यक्रम अधिकारी)
डॉ. अनूपकुमार मिश्र (सहायक)

अक्षर संयोजक
श्रीमती मिताली रत्नपारखी

मूल्य
वार्षिक शुल्क १००/-

पत्राचार-सङ्केत
महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठानम्
वेदविद्या मार्ग, चिन्तामण गणेश, पो.ऑ. जवासिया, उज्जैन (म.प्र.) 456006
दूरभाष : (0734) 2502266, 2502254 तथा फैक्स : (0734) 2502253
e-mail : msrvvpujn@gmail.com, Website : msrvvp.nic.in

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणिका

क्र.		पृष्ठ
	Editorial	i-iii
	संस्कृत-सम्भागः	
१.	निर्वचनविद्यागतानि मूलस्रोतांसि परवर्त्तिवाङ्मये विकासश्च - प्रो. रूप किशोर शास्त्री	1
२.	'वैदिकदेवतादर्शनम्' सामाजिकजीवने देवतानां प्रयोजनञ्च - डॉ. देवेन्द्र प्रसाद मिश्र	13
३.	वैदिकछन्दसां वैज्ञानिकं विवेचनं - डॉ. अजय कुमार मिश्र	20
४.	वैदिकं रसायनविज्ञानम् - डॉ. सुन्दर नारायण झा	24
५.	न्यायदर्शनदिशा वेदप्रामाण्यविचारः - डॉ. विष्णुपदमहापात्रः	36
६.	सामवेदीयच्छन्दोविमर्शः - डॉ. सदानन्द त्रिपाठी	42
	हिन्दी-सम्भाग	
७.	संस्कृतवाङ्मय में राष्ट्रीय अवधारणा (वेदों के विशिष्ट सन्दर्भ में) - डॉ. भीम सिंह	49
८.	वेदों में परमतत्त्व - डॉ. गणेशदत्त शर्मा	64
९.	वैदिक प्रहेलिकामन्त्र-विमर्श - प्रो. ओम्प्रकाश पाण्डेय	73
१०.	वैदिक पञ्चमहायज्ञ की वर्तमान में प्रासङ्गिकता - डॉ. रेखा शुक्ला	80
११.	वेदों में पुरुषार्थ - प्रो. दलबीर सिंह चाहल	90

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. वैदिकवाङ्मय एवम् आधुनिकविज्ञान में काल एवं दिक् की परिकल्पना
- डॉ. अनीता स्वामी 95

१३. वैदिकवाङ्मय में पर्यावरणचेतना
- डॉ. धनञ्जय वासुदेव द्विवेदी 106

१४. वेद एवम् आतङ्कवाद की चुनौती
- डॉ. डॉली जैन 123

१५. वैदिकभाषा कृत्रिम अथवा व्यावहारिक
- विश्व बन्धु 129

English Section

१६. Vedic Wisdom and The Effective Management
- Prof. Shashi Tiwari 136

१७. Vidyas in Vedic Literature and Their Practices in Present Day Curriculum.
- Prof. N. B. Biswas 147

१८. Vibhakti and Karaka: Paninian Perspective
- Preeti Shukla 159

१९. Similarity In Usage Of Tenses And Moods In The Veda and The Avesta
- Dr. Manoj Kumar Mishra 164

२०. Vedic Svara : An Empirical Study View
- L. Hunnargikar, M. Kulkarni 171

२१. Concept of Rebirth According to Principal Upanisads and Platonic Philosophy - A Comparative Study
- Miss. Shakuntala M. Gawde 182

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Editiorial

2012 of Christian era is the year of Silver Jubille of the Maharshi Sandipani Vedavidya Pratishthan. To go back to its history, it took birth on 20th of 1988, with the aim of protecting and spreading the oral tradition of Vedas that is the Universal source of Knowledge, having its main office at Delhi being commenced by Shri P.V. Narasimha Rao, with the full support of the then Prime Minister Late Shri Rajiv Gandhi, it continuously engaged with its aim.

In the year of 1993 this was shifted to Ujjain, in a small phase i.e. part of a floor of Pradhikaran Bhavan purchased from the Ujjain Development Authority from where it successfully managed 450 institutions spreaded over 25 provinces of our nation so far. Apart from this numourous projects were also being supported with the basic aim of spreading the Vedas the universal sources of knowledge.

2012 was the Silver Jubilee year of Rashtriya Veda Vidya Pratishthan. In this year the Pratishthan has laid down several historical measurements besides writing Golden Chapters of which worthy of considering at prime are World Veda Conference-2012 (WVC-2012), shifting to New, broad, and glorious space and publishing the Shankhayana shakha, so far unpublished and almost considered as extinct, which stood as mile stones on the continous march of the Pratishthan. The celebration of Silver Jubilee of the establishment of the Pratishthan in itself a tremendous, unforgotable and a never occurred in the history of Vedic celebration, who ever witnessed or even heard about felt unbounded and unlimited divine delight and felt showered with grace of almighty.

I strongly opine that hardly any Veda Sammelan of the Pratishthan must have witnessed such a presence and participation of a huge number of Vedic scholars of all the branches of all the Vedas i.e. 14 branches, untouched by so called

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

political personalities though mass attractive, also witnessed by the modern vedic thinkers, research scholars, Judges, Educationalists, cultural artists, writers in appreciable numbers and scholars of 11 countries were present. This was one unique meeting point of oriental, occidental, and traditional scholars where the utilisation of Modern Technology was at par excellence.

To state secondly, in the only one Institution set by the Government of India of this kind, at its completion of 25th successful years of its establishment, it extended cardial invitation to all the officials and members of the Pratishthan who have served in various capacities in its diverse dealings and endeavours irrespective of the value of service let it be minor or major all were glouriously recollected and rewarded in a specially arranged program which is suitably named as 'Rajatabhinandanasatram'.

Glority, mysticism and uncomparability of this special function was very meaningful as Pratishthan invited those personalities who were the milestones and are alive whole heartedly to exhibit the gratefulness and to reaveal the cardial congrats and so to say it felt itself very dhanya by doing so. Rajatabhinandanam the name was so befitting to this program as Rajata means related to silver jublee and abhinandanam means to please. It pleased all the members that are the uplifters of the Pratishthan in last 25 years i.e. 'Rajata'. Among these there were such unique personalities like pillor who were neither known to all nor heard off and not seen also in the matter of few. Their presence in this function made all delighted and we felt ourself consecrated. In the presence of such a huge and laudable devoted scholars, proclaiming the primier publication of the 1st part of Shankhayan Shakha of RigVeda which was found out in the form of Manuscript in the collection of Alwar Government Manuscript Library, which is considered as one among the 21 branches of Rig Veda once existing perhaps presently only one shakha named shakala is being taught and which was almost considerably extinct, Pratishthan became laudable. The author of Charanavyuha and the author of Mahabhashya mentioned the Rig

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Veda as of 21 branches - 'ekavimshati vahuvrchyam' as he has stated. It is our ambition that within three months we would come out with the remaining three volumes.

The Third and golden chapter of the Pratishthan is that it is shifted to new campus which is situated four kilo-metres away from Ujjain city. Being in the second floor of Ujjain Devlopment authority building and governing over more than 500 branches spreaded over India it could achive a new campus and transferred the office while the atmosphere was purified with the Vedic chanting of Mantras in an auspicious day in the eve of Rajata jayanti year on 12-12-12 at 12.12.p.m. arranging a special Yajna to commemorate this historical moment is highly mentionable. Pratishthan is on its onward march entering in to its new campus under the Ministry of Human Resource Development, Govt. of India spreading the Vedic knowledge. This is worthy to mention here that the Honourable Chairman of Maharshi Sandipani Rashtriya Vedavidya Pratishthan and Honourable Minister of MHRD Shri Kapil Sibal inaugurated this campus, unveiled the curtain and offering this campus to the public for the service of Vedvidya added a new charming chapter to the history of the Pratishthan. Thus the year of Silver Jubilee is entwined with several achievements. I wish the future of the Pratishthan continuous prosperous and glorious.

Every edition of **Vedavidya** our yearly magazine is being praised by the scholars and to make it popular in international level is our honest endeavour. We also attempt for making a scale through this magazine for evaluating the modern Vedic research outputs. It is our concreat opinion that the selection of the articles is to be on the basis of standard, profound research, and creativity in approach to protect the highness of the magazine stable. We believe that the articles published in this vol. will not only be satisfactory but also informatory. We also expect the opinion of the scholars to upgrade the standard of the magazine.

Prof. Roop Kishore Shastri
Secretary
Maharshi Sandipani Rashtriya Vedavidya Pratishthan
Vedavidya Marg, Chintaman Ganesh, Javasia, Ujjain (M.P) – 456 006

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 20 वेदविद्या
जुलाई-दिसम्बर 2012 ISSN – 2230-8962

निर्वचनविद्यागतानि मूलस्त्रोतांसि परवर्त्तिवाङ्मये विकासश्च

प्रो. रूप किशोर शास्त्री

विश्वेऽस्मिन् वैदिकसंहिताः आदिज्ञानवहाः प्राचीनतमसाहित्यस्वरूपा एव। निखिलैः प्राच्य-मध्य-अर्वाच्च-पौर्वास्त्य-पाश्चात्यमनीषिभिः विद्वद्भिः भाष्यकारप्रभृतिभिः संहितानाम् उत वा वेदानामादिज्ञानमुररीकृत्य सर्वासां सत्यविद्यानामक्षयशेवधिः एवञ्च पश्चादन्वेषितानां विद्यानां ज्ञाननिधेश्च मूलोत्सभूतमङ्गीकृतम्। ऋग्-यजुः-साम-अथर्वनामभिः प्रथिता चतुस्संहिताः मन्त्रबद्धा एवञ्च ऋषि-देवता-छन्द-स्वरसंयोजिताः जगतोऽद्भुतसाहित्य-स्वरूपाः समालोकिताः ताः। संहितासु ऋचानिबद्धस्य श्रेष्ठतमस्य ज्ञानस्य निम्नस्थो मन्त्रः परिज्ञापकः -

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः।
यदेषां श्रेष्ठं यदरिप्रमासीत प्रेणा तदेषां निहितं गुहाविः ॥[१]

एतदेव प्रथमं ज्ञानं यत् सर्गारम्भे साक्षात्कृतधर्माणां ऋषीणामन्तःकरणे हृद्गुहायां वा प्रभुप्रेरणास्वरूपतः आविस्सञ्जातमित्यस्य साक्ष्यं **यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम्**[२] इत्यनेन मन्त्रेण प्रतिपादितम्।

सृष्ट्यादौ अमैथुनी-सृष्टिजन्य-साक्षात्कृतधर्माणामग्नि-वायु-आदित्य-अङ्गिरा ऋणीणां हृद-येष्वखिलाः ऋचः नित्यनियतानुपू०र्यस्वरूप शाश्वत युगपदीयाः अवस्थिताः; यथा **युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्यनेन**[३] प्रमाणीक्रियते। **नियतवाचो युक्तयो नियतानुपूर्व्या भवन्ति**[४], अत्र महर्षियास्कमते वेदानामानुपूर्वी नित्या एवं संस्तुता। वेदज्ञानोऽयं कालव्यवहारदृष्ट्याऽऽक्रमारूढ एव। यथा सङ्केतितं योगभाष्ये **क्षणस्तु वस्तुपतितः क्रमावलम्बी। क्रमश्च क्षणानन्तर्यात्मा तं कालविदः काल इत्याचक्षते योगिनः**[५], स्थलेऽस्मिन् कालप्रसङ्गापेक्षया कालस्य व्यवहारगणनाऽनित्यत्वं भजते। यतो हि यत्र क्रमः तत्र कालगणनायाः स्थितिर्जायते। उक्तेष्वार्षवाक्येषु सिद्धान्ततः एतदेव मन्तव्यं स्थिरीभूतं भवति, अनया स्थित्या संहितानिहितं

---

१ ऋग्. १०/७१/१
२ ऋग्. १०/७१/३
३ न्यायदर्शने १/१/१६
४ निरु. १/१६
५ यो.भा. ३/५२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानमादिज्ञानमेकरसत्वं सेवते। एतदेव ज्ञानं पद-पदार्थ-देवता-गायत्र्यादिछन्द-मन्त्रादि विभागस्वरूपे सन्निहितमिति तथा च संहितावद्धासु ऋचासु नित्यनैमित्तिकज्ञानञ्च सूत्ररूपे प्रवृत्तमित्यपि ज्ञेयम्।

वेदज्ञानशेवधियुताः ऋचः ऋग्-यजुः-साम-अथर्वनाम्ना चतुर्षु विभागेषु विभक्ताः, ऋचावद्धाः एताः ऋक्संहिता, यजुःसंहिता, सामसंहिता, अथर्वसंहिता च नाम्नाऽपि प्रसिद्धाः। एताः सर्वाः संहिताः स्व स्व विषयप्राधान्यात् क्रमशः **ऋग्भिः शंसन्ति, यजुर्भिर्यजन्ति, सामभिः स्तुवन्ति, अथर्वभिर्जपन्ति चेत्यस्य पर्यालोके समाहिताः।** सर्वेषां पदार्थानां गुण-लक्षणादिकं शंसनमुत वा निरूपणं ऋक्संहितायाः, वस्तुनो गुणलक्षणादिकं परिज्ञातत्वात् कार्यरूपे स्थापनं विधि-विनियोग-क्रियादिसम्पादनं यजुस्संहितायाः, प्राणिनः कर्मग्रहग्रन्थिसमापनं सामसंहितायाः तथा च संशयनिवृत्तिः विशिष्टज्ञानप्राप्तिश्चाथर्वसंहितायाः प्रधानभूतविषयाः सन्ति। औपचारिकतः एतासां संहितानां स्वरूपज्ञानदृष्ट्या एतेषु मन्त्रेषु विभागः सुतराम् अभीष्टो वर्तते खलु-

तस्मात् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥[१]

यस्माद्वर्चो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखं स्कम्भं तं
ब्रूहि कतमः स्विदेव सः ॥[२]

यस्मात् पक्वादमृतं संबभूव यो गायत्र्या अधिपतिर्बभूव।
यस्मिन्वेदा निहिता विश्वरूपास्तेनौदनेनाति तराणि मृत्युम् ॥[३]

तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दो ह जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥[४]

ब्रह्म प्रजापतिर्धाता लोका वेदाः सप्त ऋषयोऽग्नयः।[५]

---

१ ऋग्, १०/९०/९
२ अथर्व. १०/७/२०
३ अथर्व. ४/३५/६
४ अथर्व. १९/६/१३
५ अथर्व. १९/९/१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतपथब्राह्मणं १४/५/४/१० तथा च गोपथब्राह्मणं १/३/१, एतयोः ग्रन्थयोश्चापि संहितानां विभागः प्रवर्त्तते।

वैदिकवाङ्मये विशेषतो वेदेषु शब्दार्थयोः नित्यतायाः शाश्वतसम्बन्धविषयं सूक्ष्मदृष्ट्या विचारयन् महर्षिपतञ्जलिः महाभाष्यपश्पशाह्निके **सिद्धे शब्दार्थसम्बन्धे** इत्यनेन शब्दार्थयोः परस्परसम्बन्धनित्यत्वं प्रतिपादयतीत्यानुपूर्वी नित्येति तथा च सृष्ट्यादौ मध्ये अन्ते च प्रलयप्रागप्यासीत्। अष्टाध्यायी २/२/२९ महाभाष्ये महर्षिणा पतञ्जलिना अभिधानं पुनः स्वाभाविकमित्युल्लेख्य शब्दार्थसम्बन्धस्य नैसर्गिकोऽन्वाख्यानः स्वीकृतः, कृतको नैवेति। शब्दार्थसम्बन्धः स्वाभाविकः शक्तिपरकश्चेति। शब्दशक्तेः नैसर्गिकतैव शब्दार्थसम्बन्ध-नित्यत्ववाहिका। एतदेव कारणं यत् परमात्मप्रेरणया सर्गारम्भे ऋषीणां हृत्सु शब्दार्थः प्रकाशितो भूत्वा शब्दो लोके व्यवहारस्वरूपो जायते। विषयोऽयं महाभाष्ये पर्याप्तं व्याख्यातमिति। शब्दार्थसम्बन्धगतं स्वाभाविकं चिन्तनमेतत् संहितासु निर्वचनप्रक्रियामाध्यमेन प्रचुरतः प्रतिपाद्यते। तत्तद्धातुनिर्देशयुतं आख्यातव्याख्यातपदाभ्यां सञ्ज्ञापदानां प्रत्यक्ष-परोक्ष-अतिपरोक्षभेदस्वरूपाः निरुक्तिसञ्ज्ञकसङ्केताः संहितासूत वा वेदेषु मूलतः नैसर्गिकतश्च प्राप्यन्ते, एतदेवोक्तस्य ग्रन्थस्य प्रधानभूत उद्देश्यो विषयश्च।

सांहितेय निरुक्तिकोषः नाम्नि ग्रन्थेऽस्मिन् सर्वाभ्यो वेदसंहिताभ्यः सूक्ष्मान्वेषणविधिना सङ्कलय्य ताः निरुक्तयोः प्रस्तुताः याः मूलतः ऋचासूपलभ्यन्ते विस्तेरण तत्र द्रष्टव्याः। एता एव निरुक्तयः नैसर्गिकभूताः तथा चैताः ब्राह्मण-आरण्यक-उपनिषद्-वेदाङ्गादिषु वाङ्मयेषु समये-समये विकसिताः प्रौढत्वङ्गताश्च। तादृशाः निरुक्तयो मया कृतभूरिपरिश्रमेण **वैदिकवाङ्मय-निर्वचनकोषः** नाम्नि ग्रन्थेऽवलोकनीयाः। आसंहितात् परवर्तीसाहित्यपर्यन्तं निर्वचनानां प्रभूतमात्रायामुपलब्धिर्वरीवर्ति। न च तेषां निर्वचनानां तारतम्यं कस्मिन्नपि काले युगे वा बाधितो जातः। एतस्मात् कारणात् निरुक्तशास्त्रं वेदाङ्गेषु प्रातिष्ठ्यं वेदपुरुषस्य श्रोत्रं स्वतन्त्रविषयञ्चापि मन्यते, यथा प्रोक्तं - **निरुक्तं श्रोत्रमुच्यते**। कालाऽबाधिते सति निर्वचनपद्धतेः न कदापि क्षयः अपितु भूयो भूयः वृद्धित्वमाप्नोति। वैदिकवाङ्मयस्य व्याख्या पृथक्-पृथक् तथापि वेदार्थोद्घाटनाय निर्वचनपद्धतिः साहाय्यपराऽनन्यतमा चेति। यद्यपि स्वयं वेदेषु वेदार्थव्याख्यायाः काचिदपि निर्धारिता पद्धतिर्नैव वर्तते, परमध्ययनपथि गते सति वेदेनैव वेदार्थः भवतीति सिद्धान्तमनुसृत्य संहितासु निर्वचनानां बीजरूपेणोपलब्धिः नैसर्गिकरूपे च व्याख्याशैल्याः सङ्केतो ध्रुवं द्योतितः।

संहिता-परवर्तितवाङ्मययोरुपलब्धनिर्वचनानां तुलनात्मकचिन्तनापेक्षया निर्वचनानां प्रस्तुतिस्वरूपे कतिपयाः उदाहरणाः प्रस्तूयन्ते यथा- महर्षिणा यास्केन निरुक्तशास्त्रे - २/५ **वृत्र** इत्यस्य पदस्य **वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा** इयं निरुक्तिः विधत्तः। निर्वचने ऽस्मिन् यास्केन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

√वृञ् - आवरणे, √वृतु - वर्तने, तथा च √वृधु -वर्धने एतान्धातुत्रयान् प्रयोगः प्रदर्शितः । अमुं पदमधिकृत्य तैत्तिरीयसंहितायां - २/५/२/२ **यदवृणोत् तद् वृत्रस्य वृत्रत्वमिति ह विज्ञायते यदवर्धत तद् वृत्रस्य वृत्रत्वमिति ह विज्ञायते,** यदवर्धत तद् वृत्रस्य वृत्रत्वमिति ह विज्ञायते इत्येताः निरुक्तयः सम्प्राप्ताः। अत्रैतासु निरुक्तिष्वपि वृत्रपदे उक्त धातुत्रयाणामस्तित्वं वर्तते। संहितास्वपि तादृशाः केचन मन्त्राः येषु धातुत्रयप्रयोगपुरस्सरं मूलनिर्वचनानां प्राप्तिः खलु यथा -

हृदा इव कुक्षयः सोमधाना समीं विव्याच सवना पुरूणि।
अन्ना यदिन्द्र प्रथमा व्याशं वृत्रं जघन्वाँ अवृणीत सोमम् ॥[१]

त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।
धत्त इन्द्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवम् ॥[२]

सहदानुं पुररुहूत क्षियन्तमहस्तमिन्द्र सं पिणक्कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥[३]

उदाहरणस्वरूपेषूक्तमन्त्रेषु क्रमशः **अवृणीत, अवर्तयत्** तथा च **वर्धमानम्** एतेषु निर्वचनगतेषु पदेषु क्रमशः √वृञ् - आवरणे, √वृतु - वर्तने, √वृधु - वर्धने च धातुत्रयाणां प्रयोगः तत्रैव सन्निहितः। इत्थम् आख्यात - व्याख्यातपदैः वृत्र इत्यस्य पदस्य ऋग्वेदे निरुक्तेः मूलोत्सं निहितम् ।

आपः पदमधिकृत्य **आपः आप्नोतेः**[४] -, **अद्भिर्वा इदं सर्वमाप्तम्**[५] । **आपो भूत्वा सर्व आप्नोत्**- जैमि.ब्रा. १/३/१४, **अद्भिरेवैनद् आप्नोति**[६], **यदाप्नोत्तस्मादापः**[७], √आप्लृ - व्याप्तौ धातुपुरस्सरं उक्तग्रन्थेष्वेताः सर्वाः निरुक्तयः उपलब्धाः। एतानि सर्वाणि निर्वचनानि संहितेतरेषु ग्रन्थेषु वर्तन्ते। सम्प्रति विचारणीयोऽयं विषयो यत् किं वेदेष्वपि निर्वचनानां मूलोपस्थितिः उत वा नास्ति। गभीरतया विचारयन् काश्चन ऋचः सम्प्रति उद्धृताः यासु निरुक्तीनां मूलोत्सं वर्वर्ति -

---

१ ऋ. ३/३६/८
२ ऋ. १/८५/९
३ ऋ. ३/३०/८
४ निरु. ९/२६, १४/३५
५ शत. ब्रा. १/१/१/१४, २/१/१/४, ४/५/७/७
६ जैमि. ब्रा. १/५५-५६
७ शत. ब्रा. ६/१/१/९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः ।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती ॥[१]

यत्प्रेषिता वरुणेनाच्छीभं समवल्गत ।
तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनुष्ठन ॥[२]

संख्याता स्तोकाः पृथिवीं संचन्ते प्राणापानैः संमिता ओषधीभिः।
असंख्याता ओप्यमानाः सुवर्णाः सर्वं व्यापुः शुचयः शुचित्वम् ॥[३]

उपर्युक्त-सांहितेय-उद्धरणेषु क्रमशः आपुः आप्नोत् तथा च व्यापुः एतैः तिङन्तपदैः प्रत्यक्षवृत्तिसञ्ज्ञकानां निरुक्तीनां मूलं प्राप्तम्। वातो वातीति सतः[४], वात आवातु[५], यदिदं सर्वं वाति तस्माद् वातः[६], वातो वाति[७], वाता वायन्ते[८] इत्यादिषु शास्त्रेषु वा - गतिगन्धनयोः धातुपुरस्सरं नैकाः निरुक्तयः सम्प्राप्ताः संहितास्वपि -

उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।
अथो इन्द्राय पातवे सुनु सोममुलूखल ॥[९]

आ वात वाहि भेषजं विवात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥[१०]

आशामाशां वि द्योततां वाता वान्तु दिशोदिशः ।
मरुद्भिः प्रच्युता मेघाः संयन्तु पृथिवीमनु ॥[११]

---

१ ऋ. १/१००/१५
२ अथर्व. ३/१३/२
३ अथर्व. १२/३/२८
४ निरु. १०/३४
५ निरु. १०/३५
६ जैमि. ब्रा. २/५६
७ जैमि. ब्रा. ३/११४
८ षड्. ब्रा. ६/८/२
९ ऋ. १/२८/६
१० ऋ. १०/१३७/३
११ अथर्व. ४/१५/८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तेगो न क्षामत्येषि पृथिवीं महि नो वाता इह वान्तु भूमौ ।
मित्रो नो अत्र वरुणो युज्यमानो अग्निर्वने न व्यसृष्ट शोकम् ॥[१]

एताः निरुक्तयः उक्तासु ऋचासु मूलतः निहिताः। अत्र क्रमशः वाति, वाहि, वान्तु पुनः वान्तु चाख्यातपदैर्निरुक्तीनामभिव्यक्तिः। √वा - गतिगन्धनयोः धातुसङ्केतिताः आख्यात-व्याख्यातपदैः निर्देश्यमानैः भूयांसो निरुक्तयः संहितासु निबद्धाः, विस्तारभयात् सर्वान् उद्धरणान् न प्रस्तुवन् तेषां सन्दर्भा एव प्रस्तूयन्ते यथा - ऋग्. १/५८/५, ८९/४, १४८/४, ४/७/१०, ५/८३/४, ७/३/२, ३५/४, ८/१८/९, १०/३१/९, ६०/११, १२५/८, १३७/२, ३, १४२/४, १६९/१, १८६/१, यजु. २५/१७, १५/६२, साम.उ. ५/१/९/२, ९/२/११/१ तथा अथर्व. ४/५/२, १५/८, १६, १३/२-३-४, ६/९१/२, ७/६९/१, ८/२/१४, १०/८/३५, १२/१/५१, १२/३/१२, १८/१/३९, २/२१, १९/१०/४ इत्यादयः।

देवार्चनप्रसङ्गे स्तुत्यर्थवाही **अर्क** इत्यस्य पदस्य महर्षिणा यास्केन **अर्को देवो भवति। यदेनमर्चन्ति, अर्को मन्त्रो भवति। यदनेनार्चन्ति। अर्कमन्नं भवति। यदर्चति भूतानि। अर्को वृक्षो भवति। प्रार्चन्ति तेऽर्कमर्किणः**[२], अस्यां निरुक्त्यामत्र **अर्चन्ति, अर्चति, प्रार्चन्ति** च एते आख्यातपदाः अभिव्यक्ताः। निरुक्तपूर्ववर्ती साहित्ये यथा-गोपथब्राह्मणे- २/४/२ **अर्क** पदस्य **अभ्यर्चन्ति**, शतपथब्राह्मणे-१०/६/५/१ **अर्चन्, अर्चत-अर्चते** एते तिङन्तपदाः निर्वचनदिशि दृष्टव्याः किन्त्वत्र एतेभ्यो ग्रन्थेभ्यः प्रागेव संहितासु भूयिष्ठाः एताः ऋचः यत्र √अर्च - पूजायां धातुसंवलिताः विभिन्नेषु लकारेषु प्रयुक्ताः आख्यातपदाः निरुक्तिभावभूषिताः भूयांसः पदाः दृष्टीभूताः; यथा -

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे॥[३]

य उग्रा अर्कमानृचुरनाधृष्टास ओजसा॥
मरुद्भिरग्न आ गहि॥[४]

प्र मन्महे शवसानाय शूषमाङ्गूषं निर्वणसे अङ्गिरस्वत्।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्क नरे विश्रुताय॥[५]

---

१ अथर्व. १८/१/३९
२ निरु. ५/५
३ ऋ. १/१०/१
४ ऋ. १/१९/४
५ ऋ. १/६२/१, यजु. ३४/१६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वत्सो विराजो वृषभो मतीनामा रुरोह शुक्रपृष्ठोऽन्तरिक्षम्।
घृतेनार्कमभ्यर्चन्ति वत्सं ब्रह्म सन्तं ब्रह्मणा वर्धयन्ति॥[१]

उक्तेषूद्धरणेषु क्रमशः **अर्चन्ति, आनृचुः, आर्चाम, अभ्यर्चन्ति,** चाख्यातपदैर्निरुक्तयः प्रथिताः न तु मात्रैतानि निर्वचनप्रदर्शनानि परञ्चात्र संहितासु शोधदृष्ट्या ज्ञायते यत् ऋ. १/८५/२ - **अर्चन्तः** ऋ. १/१६६/७ - **अर्चन्ति,** ऋ. ५/२९/१२ - **अभ्यर्चन्ति,** ऋ. ५/३०/६ - **अर्चन्ति,** ऋ. ५/३१/५ - **अर्चान्,** ऋ. ६/५०/१५ - **अभ्यर्चन्ति,** ऋ. ७/२३/६- **अभ्यर्चन्ति,** ऋ. ८/५१/१० - **आनृचुः,** ऋ. ८/९२/१९ - **अर्चन्तु,** ऋ. १०/११२/९ - **अर्च,** यजु. ३४/१६ - **आर्चाम,** यजु. २०/५४ - **अभ्यर्चन्ति,** साम. पू. ४/२/१/१, साम. उ. ७/७/४/२ - **अर्चन्ति,** अथर्व. २०/१२/६ - **अभ्यर्चन्ति,** अथर्व. २०/११९/२ - **आनृचुः,** अथर्व. २०/११०/१ - **अर्चन्तु,** अथर्व. १३/१/३३ - **अभ्यर्चन्तु** एतेषु स्थलेषु मन्त्रेषु वा अर्क पदस्य निर्वचनानां स्थितिः दृढीभूता।

यास्कर्षिणा **पपुरि** नामकः पदः **पिपर्ति पपुरिरिति पृणातिनिगमौ वा। प्रीणातिनिगमौ वा** - निरु. ५/२४, अनया निरुक्त्या सनाथीकृतः। निरुक्तशास्त्रे निरुक्तिरियं √पृ - पालनपूरणयोः तथा च √पृण - प्रीणने धातुनिर्देशपूर्वकं क्रमशः **पृणाति, प्रीणाति** चैताभ्यामाख्यातपदाभ्यां प्राप्नोति। पपुरि पदमधिकृत्येयं दिशा ऋग्वेदीय १/४६/४ ऋचः गृहीता। अस्य पदस्य मूलनिर्वचनं तस्यामेव ऋचि √पृ - पालनपूरणयोः धातुसंवलितः **पिपर्ति** इत्यनेनाख्यातपदेन दृश्यते **हविषा जारो अपां पिपर्ति पपुरिर्नराः पिता कुटस्य चर्षणिः** - ऋ. १/४६/४, यद्यपि उक्तऋचायां प्रतिपादिते मूलनिर्वचनेऽपि निरुक्तशास्त्रे स्वकीयां भिन्नां निरुक्तिं प्रस्तुवता महर्षिणा यास्केन श्लाघनीयः प्रयासः प्रस्तुतः। √पृण-प्रीणने धातुप्रयोगपुरस्सरं संहितायां निर्वचन प्राप्तिसन्दर्भे मौलिकत्वं वर्तते, यत्र पृणन्त इति व्याख्यातपदेन निरुक्तिः प्रदर्श्यते -

उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः।
पृणन्तं च पपुरि च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः॥[२]

अन्यत्र

इन्द्रं ज्येष्ठं न आ भरँ ओजिष्ठं पपुरिं श्रवः।
येनेमे चित्रवज्रहस्त रोदसी ओभे सुशिप्र प्राः॥[३]

---

१ अथर्व. १३/१/३३
२ ऋ. १/१२५/४
३ ऋ. ६/४६/५, अथर्व. २०/८०/१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् मन्त्रे प्रा - प्रपूरणे धातुप्रयोगपूर्वकं **प्राः** इत्यनेनाख्यातपदेन **पपुरिः** पदस्य निरुक्तिः विद्यते, यस्याः परवर्तीसाहित्ये प्रयोगः सम्प्रत्यपि नैव दृश्यते।

कीकटा नाम देशोऽनार्यनिवासः। कीकटाः किं कृताः किं क्रियाभिरिति प्रेप्सा वा इतीयं निरुक्तिः **कीकटाः** पदस्य यास्काचार्येण निरुक्तशास्त्रे - ६/३५ प्रदत्ता। अस्यां निरुक्त्यां कीकट नाम अनार्यनिवासस्थानं प्रतिपादितमिति। किं कृताः > किं कृता (टा) > कीकटा। किं क्रियाभिः> किक्रिता > कीकता > कीकटा, इत्थं वर्णविकारैः कीकट पदस्य निष्पन्नता, एतस्यां प्रक्रियायां निरुक्तिगत प्रदर्शने वा किं + डुकृञ् - करणे मूलत्वं निगूढमिति। एवम्भूतमेकमुदाहरणं मूलरूपेण ऋग्वेदे प्राप्यते -

किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम्।
आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः॥[1]

अत्रापि किं + √डुकृञ् - करणे धातुप्रयोगपुरस्सरं किं कृण्वन्ति आख्यातपदेन कीकट पदस्य स्पष्टं निर्वचनं दृष्टिगोचरीभूतम्, एतदेव निर्वचनं यास्काचार्येण स्वकीये निरुक्तशास्त्रे किं कृता किं क्रियाभिश्च प्रयोगेण अन्वाख्यातमिति। ऋग्वेदभाष्यकारो वेङ्कटमाधवोऽपि **किं क्रियाभिः इति ये मन्यन्ते कीकटाः नास्तिकाः** इत्याशयं प्रस्तुवन् ऋग्वेदभाष्ये - ३/५३/१४ निरुक्तिः प्रस्तौति।

गीः **वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम्।**
होम गन्तारमूतये॥[2]

एतत्त्यत्त इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः।
ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः॥[3]

गृ - शब्दे धातोः क्विप् प्रत्ययः तथा च **वोरुपधाया दीर्घ इकः** - अष्टा. ८/२/७६ **सूत्रेण ऋकारान्त धातोरुपधाया इकारो दीर्घश्च** विधाय निष्पन्नो **गीः** पदस्य मूलतो नैकानि निर्वचनानि संहितासूपलब्धानि। ऋ. २/९/९, अथर्व. २०/७१/१५, ऋ. ४/१०/४, ऋ. ५/८/४ **गृणन्तः**, ऋ. १/१००/१, ४/३२/११, ६/३४/३, ८/४६/३, ८/५४/१, १०/६/५ **गृणन्ति**, ऋ. ५/२७/३ **गृणान्ति**, ऋ. ५/५३/१६ **गृणीहि**, ऋ. ६/१५/६ **गृणीषणि**, ऋ. ६/१५/७, साम. उ.

---

१ ऋ. ३/५३/१४
२ ऋ. १/९/९, अथर्व. २०/७१/१५
३ ऋ. १/१००/१७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७/२/१३/१ (१५६७) **गृणे**, ऋ. ६/४४/१३ **गृणताम्**, ऋ. ८/१३/१० **गृणानः**, तथा च ऋ. १०/१२/१४ **गृणीमसि** इत्यादिभिराख्यातपदैः पुरस्कृत्य निरुक्तयः दृश्यन्ते।

गीः नाम स्तोत्राणां ऋचां वा। **गीर्यन्ते स्तूयन्ते इति गीः** अथर्व. भा. १/१५/२, १९/१/१ अनेन वाक्येनाचार्यसायणः स्पष्टीकरोति। महर्षिणा दयानन्देन **गायन्ति पदार्थान् यया सा** - ऋ. भा. ५/४३/८ इत्यत्र गीः इत्यस्य पदस्य निरुक्तिः **गायन्ति** आख्यातपदेन प्रदर्शितेति स्तुतेः साक्षात् सम्बन्धः व्यस्तीकृतश्च। **गिरः स्तुतयः गिरतेः गृणातेः** निरु. १०/५ अनया निरुक्त्या संहितास्थ नैसर्गिक-निरुक्तीन् प्रति स्वकीयं आभारं प्रकटीकृतम्। भाषावैज्ञानिकक्षेत्रे तुलनात्मकदृष्ट्या √गृ धातोः याथातथ्यमुत वा किञ्चित् वर्णभेदं पुरस्कृत्य लिथुआनियनभाषायां √गृ-शब्दे > गर्बे (बकारागमः) > garbe, लैटिनभाषायां > गृ शब्दे (तुगागमः) > गृतुस् > ग्रतुस् > gratus, रोमानियनभाषायां √गृ > ग्रई > grai तथा च अवेस्ताभाषायां √गृ > गर > gar इत्यादयः शब्दाकृतयः प्राप्यन्ते। एतेषु यद्यपि ध्वन्यात्मकं परिवर्तनं तु ध्रुवं, परञ्चात्र शब्दार्थयोः साम्यस्थितिः प्रायः एकैव प्रतीयते।

गोः **याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गो अर्णसः ।**
याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥[1]

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥[2]

यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् ।
विद्या ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥[3]

संहितासु गोः सम्बन्धिपर्याप्ताः ऋचः सूक्तानि तत्रैव पदस्यास्य बहवो नैसर्गिकस्वरूपाः निरुक्तयश्चापि प्राप्यन्ते। गोपदमभिलक्ष्य ऋ. १/८३/१ - **गच्छति**, ऋ. १/११२/१८ **गच्छथ**, ऋ. ३/८३/५ **अनुग्मन्**, ऋ. ३/५६/२ **अगुः**, ऋ. ४/३८/४, ४/४५९ **गच्छन्**, ऋ. ६/२८/१, अथर्व. ४/२१/१ **अग्मन्**, ऋ. ८/४५/१०, ८/५१/५ **गमेम**, ऋ. ९/४९/२, साम.उ. ६/३/१/२ (१४३६) - **आममन्**, ऋ. ९/६६/१२, साम.उ. १/१/३/३ (६५९) - **अग्मन्**, ऋ.

---

१ ऋग. १/११२/१८
२ ऋग. ६/२८/१, अथर्व. ४/२१/१
३ ऋग. ८/५१/५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९/८६/१२ **गच्छति**, साम. उ. ४/१/१/३ (१०३३) - **गच्छसि**, ऋ. ६/४५/२४ तथा च साम. उ. ८/२/४/३ (१६६८) - **गमत्** इत्यत्र एतैराख्यातपदैः निर्वचनानि निबद्धानि। विभिन्नेषु लकारेषु प्रयुज्यमानानां **√गम्लृ-गतौ** धातुनिष्पन्नानाम् उक्ताख्यातपदानां प्रयोगः प्रत्यक्षभूतः तथा अस्यामेव धातोः **गमेर्डोः** उणादिकोषः २/६७ । इत्यनेनोणादिसूत्रेण डोः प्रत्यये कृते सति गोः पदः सिध्यति, णित्वात् वृद्धिपूर्वकेण **गौः** इत्यपि निष्पन्नः । गोः उत वा गौः उभयोः पदयोः व्यवहारः परिलक्ष्यते। एतैराख्यातपदैः गो पदस्य निर्वचनान्यत्र प्रत्यक्षभूतानि नास्त्यत्र कश्चित् संशयः। प्रस्तुतेष्वेतेषु सर्वेषूद्धरणेषु **√गम्लृ-गतौ** धातु संवलितैराख्यातपदैर्निरुक्तीनां प्रदर्शनमिति। एतान् निर्वचनान् प्रधानतया मनसि निधाय महर्षिः यास्कः **गौरिति पृथिव्या नामधेयम्। यद्दूरङ्गत्ता भवति। यच्चास्यां भूतानि गच्छन्ति** - निरु. २/५ इति गो पदस्य निरुक्तिमप्रदर्शयत स्वकीये निरुक्तशास्त्रे। अस्यामेव निरुक्त्यां गौणतः **√गाङ् गतौ** धातोरपि निरुक्तिः विहिता-गातेर्वौकारो नामकरणः निरु. २/५ स्पष्टमेतदुभावपि निरुक्ती गमनार्थकौ स्तः।

विचारणीयमेतत् यदुक्तनिरुक्तीनामभिधेयात्मकाः पदाः कस्मिन् कस्मिन् गमनार्थकेषु तत्त्वेषु प्रयुक्ताः उतः वा गो पदस्य कस्मिन्कस्मिन्सन्दर्भेऽर्थोऽभीष्टो भवति। सामान्यतः वेदेषु गो पदस्तु पृथिवी, धेनु, ज्या, सूर्यरश्मिः, आदित्यः, इन्द्रियाणि, वाक् एवं ऋक् वाचीति अर्थप्रसङ्गे प्रयुज्यते। एते सन्दर्भाः निघण्टु - १/१, १५, १/११, ३/१६ इत्यादिषु स्थलेषु पठिताः। निरुक्तकारेण यास्केन गौ इत्यस्य पदस्य पृथिवी, गौ पशुविशेषः, गोदुग्धं, अधिषवण चर्म, ज्या, प्रत्यञ्चा, आदित्यः, इन्द्रियाणि, सुषम्णरश्मिः, द्यौः तथा च माध्यमिकी वागित्यादयः अर्थाः विहिताः गोविकारजाणि सर्वाणि पदार्थानि गोपदवाच्याः। यास्काचार्येण गोपदस्य मुख्यार्थः पृथिवी इति प्रस्तुतः द्वितीयं - **यद्दूरं गता भवति** अर्थात् विस्तृतभूभागपर्यन्तं गतवती भवति। तृतीयं - **यच्चास्यां भूतानि गच्छन्ति**। सततगमनात् उत वा सूर्यकक्षायाः परिक्रमणात् पृथिवी गो। नैकान्यैतादृशानि प्रमाणानि उपलब्धानि वेदेषु यथा - **आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः** - यजु. ३/६, **वर्षेण भूमिः पृथिवी वृतावृता** - अथर्व. १२/१/५२, **या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः** ऋ. १०/६५/६ इत्यादिषु मन्त्रेषु गौ - पृथिवी स्वकीयायां कक्षायां सूर्यं परिक्रमति। प्रसङ्गममुमभिलक्ष्य ऋ. ८/१०१/१४, १०/२२/१४, १/१६४/१७, २/११/२, यजु. ८/९ इत्यादयः ऋचः प्रमाणस्वरूपाः द्रष्टव्याः।

उपर्युद्धृतासु ऋचासु गो पदस्य निर्वचनगतानां सञ्ज्ञापदानां विभिन्ना अर्थाः वस्तुप्रकरण-सन्दर्भानुसारेण बोध्याः प्रयोक्तव्याश्च। एताः निरुक्तयः वेदेषु व्याख्यानग्रन्थस्वरूपब्राह्मण-ग्रन्थेष्वपि प्रायः प्राप्यन्ते। ताण्ड्यमहाब्राह्मणे गोशब्दो यज्ञविशेषे प्रयुक्तः **यद्वै तद्देवा आसुरानेभ्यो लोकेभ्यो गोवयंस्तद्गोर्गोत्वम्** तां. ब्रा. १६/२/३, सन्दर्भोऽयं वर्णयति यद् देवैः सम्पादितेन गो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामक यज्ञेनासुराः गोवयन् अर्थात् पराभूताः जाताः; अस्मात् कारणात् एतदेव गोः गोत्वमिति। अस्मिन्नेव सन्दर्भे आचार्यः सायणः तिरोधानार्थं गत्यर्थकं छान्दस् √गोवि धातुं स्वीकरोति। गोवयति तिरोधानार्थः। छान्दसो धातुः। तस्य च क्विपि पृषोदरादित्वं गोभाव इति - ता. ब्रा. (सायणभाष्य) १६/२/३; अत्र सायणाचार्येण स्वकीये भाष्ये स्पष्टतः पृषोदरादिभावतः गोभावः उररीकृतः। शतपथब्राह्मणम् ३/१/२/१४ इत्यत्र प्राणीनां पोषणत्वात् पृथिवी गो एव प्रथिता **गौर्वा इदं सर्वं बिभर्ति। हन्त येयं पुरुषे त्वक् गव्येतां दधाय** तथा च अस्मिन्नेव ब्राह्मणे **अथो गौरिति ब्रूयात्। इमे वै लोका गौः। यद्धि किञ्च गच्छति। इमान् लोकानागच्छति। इमे उ लोकाः एषोऽग्निः। तस्मात् गौरिति ब्रूयात्** -शतपथब्राह्मणम् ६/१/२/३५, अत्र गो नाम लोकेभ्योऽलङ्कृतः यतो हि एते सर्वे लोकाः सततगमनशीलाः तथा च आन्तरिक ऊर्जास्रोतस्वरूपा एव तस्मात् कारणात् ब्राह्मणे ग्रन्थेऽस्मिन् एते लोका गोपदवाच्याः। इमामवधारणामनुसृत्य महर्षिणा दयानन्देनापि स्वग्रन्थेषु नैकाः निरुक्तयोऽर्थाश्च विधत्ताः; यथा **गच्छतीति गौः पृथिवी** - ऋ.भा. १/१६४/१७, **गच्छति यो यत्र यया वा सा गौः पशुरिन्द्रियं सुखं किरणो वज्रं चन्द्रमा भूमि वाणी जलं वा** - उणादिकोषः २/६७ । अस्यां निरुक्त्यां गोपदस्य पृथिवी, धेनु, सुखम्, इन्द्रियं, किरणं, वज्रं, चन्द्रमा, भूमि, वाक्, जलञ्चेति, एते अर्थाः प्रस्तुवन् ऋगादिसंहिता-शतपथादिब्राह्मणाद्यार्षग्रन्थान् प्रति स्वकीयं सापेक्षचिन्तनं प्रस्तुतम्। भाषा-वैज्ञानिकदृष्ट्या गो (गौ) गाव् - कुत्वे सति काव > Cow इति प्रसिद्धः।

तनयः **परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतीर्महीगात्।**
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ॥[1]

अस्यामृग्वेदीयऋचायां तनयः इत्यस्य पदस्य निरुक्तिः तनुष्व आख्यातपदेनाभिव्यक्तिर्वर्तते खलू। निरुक्तिगतपदोऽयं **√तनु-विस्तारे** धातोः सङ्केतितः। प्रत्यक्षसंस्कारसामर्थ्यादयं प्रत्यक्षवृत्याश्रितः। आचार्येण यास्केन स्वकीये निरुक्तशास्त्रेऽस्य तनयः **पदस्य** निरुक्तिश्चापि **√तनु-विस्तारे** धातोः प्रस्तुतः - **तनयः तनोतेः** - निरु. १०/७, अत्र **तनोतेः** पदोऽयं निरुक्तेरभिव्यञ्जकः प्रथितः। आचार्यदेवराजयज्वापि निघण्टुवृत्तौ **तनयं अपत्यं कुलं तनोति विस्तारयति** इत्यनेन **तनय** पदस्यापत्यार्थे स्पष्टतः प्रतिपादयति अनेन सार्धं **तनोति** इत्याख्यातपदेन निरुक्तिरियं सङ्केतितेति। **√तनु-विस्तारे** धातोः **वलिमलितनिभ्यः कयन्** उणादिकोषः ४/९९ सूत्रेणौणादिके **कयन्** प्रत्यये कृते सति निष्पन्नोऽयं **तनयः** शब्दः पुत्र-पौत्रादि अपत्यसञ्ज्ञकः प्रसिद्धः। निघण्टुकारेण **तनयः अपत्यनाम** - निघण्टु २/२ इत्यत्रापत्यार्थे एव

१ ऋ. २/३३/१४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पठितः। कुल-संस्कृति-सभ्यता-यशः कीर्ति-सन्ततीनां सकारात्मकविस्तृतत्वेनापत्यस्य नाम **तनयः** इति व्यक्तीभूतः।

इत्थं विषयोऽयं भाषाविज्ञानदृष्ट्या परिपुष्टः परिलक्षितश्चापि भवति। वस्तुतः अस्याः निरुक्तेः मूलोत्सं ऋग्वेदीयास्यां ऋचि सम्यक्तया निहितम्। एवंविधा निरुक्तीनां विद्यमाना मौलिकशेवधिः संहितासु पदे-पदे निगूढा वर्तते। एतासां संहितास्थमूलनिरुक्तीनां परवर्तिसाहित्ये यथा ब्राह्मण-आरण्यक-उपनिषदादिषु ग्रन्थेषु विकासः, तथा च वेदव्याख्याशैलीरूपे स्वातन्त्र्यं भजते। परञ्चात्र निर्वचनविद्यायाः पूर्णपरिष्कृतरूपप्रदाने कृत्स्नं श्रेयसं आदिवेदभाष्यकारः प्रथितभाषाविज्ञान-मार्तण्डो महर्षियास्कः सेवते नास्त्यत्र काचिदपि विप्रतिपत्तिः। अनेनैव ऋषिणा सर्वेषां विदुषां सामान्यजनानाञ्च वेदविद्यानिमज्जने उत वा तेभ्यो वेदकुञ्जिकां प्रदाय वेदज्ञानविज्ञानक्षेत्रे मार्गप्रशस्तः कृतः। संहिताभ्यः त्वार्षप्रज्ञयाधिगत-दिव्यनिर्वचनवैज्ञानिकेन यास्काचार्येण संसारेऽस्मिन् जनेभ्यो विद्वद्भ्यश्च वेदार्थे दिव्यदृष्टिः प्रदत्ता। यद्यपि यास्केन **समाम्नायः समाम्नातः स व्याख्यातव्यः** - निरु. १/१ इति स्वप्रतिज्ञानुसारम् अपेक्षाकृतानि न्यूनानि निर्वचनानि कृतानि, यदि निघण्टुनिर्दिष्टपदानां निरुक्तिः कृता भवति चेद् वेदविद्याज्ञानविज्ञानशेवधौ स्वर्णे सुगन्धिर्जगत्सौभाग्यञ्च जायेत, तथापि यत्किञ्चिदपि प्राप्तं तदेवापारं ज्ञानभण्डारमिति। **अर्थनित्यः परीक्षेत, न त्वेव न निब्रूयात्** एव महर्षेः यास्कस्य निर्वचनक्षेत्रे वेद एवं च निर्वचनविद्याजिज्ञासुभ्यो मूलमन्त्रः खलू।

प्रो. रूप किशोर शास्त्री
सचिव
महर्षि सान्दीपनि राष्ट्रिय वेदविद्या प्रतिष्ठान
वेदविद्या मार्ग, चिन्तामण गणेश, उज्जैन ४५६००६ (म.प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 20
जुलाई-दिसम्बर 2012

वेदविद्या
ISSN – 2230-8962

'वैदिकदेवतादर्शनम्' सामाजिकजीवने देवतानां प्रयोजनञ्च

डॉ. देवेन्द्रप्रसादमिश्रः

वेदः - विद् धातोः घञ्-प्रत्ययेन वेदशब्दो निष्पद्यते। विद् धातुश्च विभिन्नार्थेषु पठ्यते। विद् ज्ञाने, विद् विचारणे, विद्लृ लाभे, विद् सत्तायाम् इत्यादिधातुभ्यो निष्पद्यते। अक्षरग्रहणान्तरमर्थविचारः, ततोऽभीष्टलाभः, तेन सामाजिकी स्थितिः सुदृढा भवतीत्यर्थमवगन्तुं शक्यते। यद्वा ज्ञानं सत्ता लाभश्चेत्यर्थाः ग्रहीतुं शक्यन्ते। घञ् प्रत्ययस्य भावे अकर्तरि च कारके विधीयमानत्वात् ज्ञानसाधनम्, ज्ञानकर्म, ज्ञानाधिकरणम्, एवमेव (सत्ता) सत्तासाधनम्, सत्ताकर्म, सत्ताधिकरणम्, (स्थितिः) स्थितिसाधनम्, स्थितिकर्म, स्थित्यधिकारणञ्चेत्यादि सर्वं वेदशब्दार्थतया व्याख्यातुं शक्यते। एक एव वेदशब्दः स्वरभेदात् भिन्नार्थमादधाति। तत्राद्युदात्तः वेदशब्दः शब्दराशेर्बोधकः ग्रन्थवाचकः। अपरस्तु अन्त्योदात्तः कुशमुष्टेर्बोधकः **'वेदं कृत्वा वेदिः करोतीति'** श्रौतवचनात्। वेदशब्दाभिधेयस्य कुशमुष्टेर्बन्धनान्तरं दर्शपूर्णमासवेदेर्निर्माणं करोत्यध्वर्युः। तत्र वेदविमोके मन्त्रः - **'वेदोऽसि येन त्वं देव वेद देवेभ्यो वेदो ऽभवस्तेन मह्यं वेदो भूयाः।'**[१]

वैदिकशब्दः - वेदं वेत्त्यधीते वा ठञ् वेदेषु विहितः वेद + ठक्[२] प्रत्ययेन वा वैदिकशब्दः निष्पद्यते। वेदे भवः वैदिकः।

देवताशब्दः - देव + तल् + टाप् प्रत्ययेन देवताशब्दः निष्पद्यते। देवताशब्दस्य निर्वचनम् - **'देवो दानाद्वा, दीपनाद्वा, द्योतनाद्वेति'**[३] भवति।

देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्तताम्।
देवानाꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे॥[४]

अर्थात् कल्याणकारिणी देवानां शोभना बुद्धिः अस्मान्प्रत्यभिमुखीभवतु। देवस्य दानं नोऽभिनिवर्तताम्, वयं देवानां सख्यं मैत्रीं प्राप्नुयाम,[५] देवाः अस्माकं सखीनामायुः प्रवर्धयन्तु। किमर्थम् ? जीवसे, चिररात्राय जीवनाय अमृतत्वाय, मोक्षलाभायेति यावत्।

दर्शनम् - दृश् धातोः ल्युट् प्रत्ययेन दर्शनशब्दस्य सिद्धिर्भवति।

---

१ शु.य. २/२१
२ ठस्येकः (महर्षिपाणिनिसूत्रम्, ७/३/५०)
३ निरुक्तम्, १२/४
४ शु.य.वे. २५/१५
५ 'द्वा सुपर्णा सयुजा सखाया' ऋ. सं. १/१६४/२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुष्यो यस्मिन् दिवसेऽस्याः प्रकृत्या उत्सङ्गे नेत्रोन्मीलनमकरोत्तत्प्रभृतिप्रधानरूपेण जीवात्मा, प्रकृतिः तथोक्तयोर्द्वयोः प्रवर्तकश्चेति विषयानधिकृत्य विचारयितुमारभत। यद्यपि सर्वाणि दर्शनानि भगवत्सत्तां नाङ्गीकुर्वन्ति तथापि आस्तिकानि नास्तिकानि च दर्शनानि, जीवेश्वर-प्रकृतीरधिकृत्य विस्तृतं विचारं चक्रुः। भगवदस्तित्वमनङ्गीकुर्वाणा अपि भगवत्सत्तामधिकृत्य बहून् हेतुवादाँश्चक्रुः।

वेदस्यावलोकनेनेदं स्पष्टीभवति यत् ईश्वर एव सृष्टि-स्थिति-लय-हेतुरिति। यथा-

अरे अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति।[१]

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम्॥[२]

जाकी सहज स्वास श्रुति चारी। सो हरि पढ़ यह कौतुक भारी॥[३]

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥[४]

श्रीमद्भागवतेऽपि -

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥[५]

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या
वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्।
तैस्तैरतुष्टहृदयः पुरुषं विधाय
ब्रह्मावलोकधिषणं मुदमाप देवः॥[६]

धर्माऽधर्मयोर्विषये वेदानां प्रामाण्यमक्षुण्णम्। धर्माऽधर्मव्यवस्थापि वेदाधीनैव। वेदविहितकर्मणामनुष्ठानेनैव मनुष्यः श्रेयः प्रेयश्चोभे अप्यनायासेनाऽधिगच्छति। अस्य धर्मस्यानुष्ठानेनैव मनुष्योऽभ्युदयनिःश्रेयसे प्राप्नोति।[७] स्वकृतस्य कर्मणोऽनुरूपमेव जीवस्तत्तज्जन्मानि, सुखम्, दुःखम्, स्वर्गम्, नरकं लभते। वेदा एव मनुष्यं विहितकर्मसु प्रवर्तयन्ति तथा

---

१ बृहदारण्यकोपनिषद्, ४/५/११
२ सायणाचार्यविरचितानां स्ववेदभाष्यभूमिकानां सङ्ग्रहः, पृ. ७३
३ रामचरितमानसे, १/२०४
४ श्वेताश्वतरोपनिषद् ६/१८
५ श्रीमद्भागवते १/१/१
६ श्रीमद्भागवते ११/९/२८
७ कर्मणैव हि संसिद्धिमास्थिता जनकादयः। लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि॥ श्रीमद्भगवद्गीता, ३/२०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निषिद्धकर्मभ्यो निवर्तयन्ति च। वेदविहितानि सर्वाणि यज्ञयागादीनि कर्माणि, तत्तद्देवता उद्दिश्य विहितानि। तास्ता देवता उद्दिश्य मन्त्रोच्चारणपूर्वकं हविस्समर्पणमेव यागः -

द्रव्यं देवता त्यागः[१]

तथा च - **यस्मै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद् वषट् करिष्यन्निति ह विज्ञायते॥**[२]

अत्राऽयं प्रश्नस्समुत्पद्यते, याः याः देवता उद्दिश्याऽस्माभिराज्यादिकं हविस्समर्प्यते किम् ? ताः ताः देवताः मानवा इव किमपि वस्तु हवीरूपेण दत्तं भुञ्जते ? किं वा देवता अपि मनुष्यवत् सशरीराः ? किमाकारस्य चिन्त्यते ?

यद्यपि '**माहाभाग्याद् देवताया एक आत्मा बहुधा स्तूयते**'[३] तथापि मनुष्यवत् ते निखिलं व्यापारं विदधति। यथा मानवेषु परस्परं वार्तालापो भवति तद्वत् देवेष्वपि दृश्यते। तस्मादुभयेषामुपकरणोपकर्तव्यता सामान्यात् मनुष्याश्ववदनित्यत्वं देवानामिति। मन्त्रेषु देवानां स्वरूपदर्शनं मनुष्या इव, तेषां शरीरस्य विविधानामङ्गानां स्तुतय उपलभ्यन्ते -

ऋष्वा त इन्द्र स्थविरस्य बाहू[४]

मन्त्रेऽस्मिन् इन्द्रस्य भुजबलस्य प्रशंसा विद्यते।

नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः॥[५]

अत्र रुद्रस्य बाह्वोः मन्यो इषोश्च नमस्कारः विद्यते, हे रुद्र ! मङ्गलविधायकं तव शरीरम् अघोरम् अविषमं पुण्यप्रदर्शिनी च विद्यते। तया तन्वा अस्मभ्यं सुखं देहि -

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि॥[६]

श्रुतिः कथयति यद् **विराट्पुरुषः शिरो-मुख-चक्षुः श्रोत्र-मनो-बाहूरु-प्राण-नाभि-पदप्रभृतिभिः निखिलं विश्वमरचयत्।**[७] अत्र नारायणस्य शिरः प्रभृत्यङ्गानां मनुष्यवत् चर्चा विहिता वर्तते। पौरुषविधिकैः कर्मभिः एव संस्तूयन्ते देवताः -

'अद्धीन्द्र पिब च प्रस्थितस्य'[८]

अर्थात् हे इन्द्र ! त्वमस्य सोमस्य प्रस्थितस्य प्रवहतः अद्धि पिव च स्वमंशमिति।

'तेषां मनुष्यवत् देवताविधानम्'[१]

---

१ कात्यायनश्रौतसूत्रे, १/२/२
२ निरुक्तम् ८/३
३ निरुक्तम् ७/१
४ ऋ. ३/३०/५
५ शुक्लयजुर्वेदे १६/१
६ शुक्लयजुर्वेदे १६/२
७ शुक्लयजुर्वेदे ३१/१-१६
८ ऋ. १०/११६/७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थात् यथैव हि मनुष्याः प्रयोजनेषु नामाख्यातोपसर्गनिपातैर्यथार्थमभिव्यवहरन्ति। एवमेव देवा अपि।

अपि वा पुरुषविधानामेव सतां कर्मात्मान एते स्युः। यथा यज्ञो यजमानस्य।[२]

महाभारत एष एव सिद्धान्तः प्रदर्शितः। पृथिवी स्त्रीरूपेण भारावतारणाय ब्रह्माणं ययाचे। अग्निश्च ब्राह्मणरूपेण वासुदेवार्जुनावुभौ खाण्डवे ययाचे। पुरुषेणाग्निरूपेण च खाण्डवं ददाह। एष एव सिद्धान्तो देव्यास्सीताया अग्निपरीक्षाप्रसङ्गेऽपि श्रीमद्वाल्मीकिरामायणे प्रदर्शितः। हुताशने प्रविष्टां साध्वीं जानकीं गृहीत्वा अग्निस्स्वयमुत्तस्थौ, सः कर्मसाक्षी करुणावरुणालयं रामं सम्बोध्येदमवदत् -

एष ते राम वैदेही पापमस्यां न विद्यते।
नैव वाचा न मनसा नैव बुद्ध्या न चक्षुषा।
सुवृत्ता वृत्तशौटीर्यं न त्वामत्यचरच्छुभा॥
विशुद्धभावां निष्पापां प्रतिगृह्णीष्व मैथिलीम्।
न किञ्चिदभिधातव्या अहमाज्ञापयामि ते॥[३]

अस्य मतस्य पुष्टिर्महात्मना तुलसीदासेनापि श्रीरामचरितमानसे कृता -

धरि रूप पावक पानि गहि श्री सत्य श्रुति जग बिदित जो।
जिमि छीरसागर इन्दिरा रामहिं समर्पी आनि सो॥
सो राम बाम बिभाग राजति रुचिर अति शोभा भली।
नव नील नीरज निकट मानहुँ कनक पङ्कज की कली॥[४]

श्रीरामचन्द्रोऽपि देव्या सीतया, लक्ष्मण-विभीषण-सुग्रीवाङ्गद-हनुमदादिभिर्वी-रैस्सह पुष्पकमारुह्य अयोध्यां नगरीं भरताय दत्तं वचनमनुसृत्य प्रतिन्यवर्तत। तदेतच्चतुर्धा भिद्यते - मन्त्रार्थदर्शनादेव (१) पौरुषविध्यम् (२) अपौरुषविध्यम् (३) कर्मार्थात्मोभयविध्यम्, तथा च (४) नित्यमौभयविध्यमेवेति। मनुष्यवद् देवानामपि वर्णनं शौनकीयबृहद्देवतायामपि समुपलभ्यते-

सप्तर्षयो वसवश्चापि देवा अथर्वाणो भृगवः सोमसूर्याः।
पथ्या स्वस्ती रोदसी चोक्तमन्त्रे कुहूर्गुङ्गूरदितिर्धेनुरघ्न्या॥
असुनीतिरिळा चास्या विधातानुमतिर्ह या।
आङ्गिरोभिः सहैताः स्युर् उक्तमन्त्राश्च देवताः॥[५]

साम्प्रतिके झञ्झामये वातावरणे निखिलं जगत् विविधैरुपद्रवैरुत्पातैः, आर्तनादैः, कोलाहलैः, हाहाकारैश्च उद्विग्नमिव दृश्यते। आधिव्याधिभिः पीडितजनाः सुरक्षार्थमन्येषां

१ निरुक्तम् १/१
२ निरुक्तम् ७/२
३ वा. रा. ६/११८/६-१०
४ श्रीरामचरितमानसे ६/१०९
५ शौनकीयबृहद्देवता ८/१२५-१२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहायकानां साहाय्यं याचन्ते, दीनतां च भजन्ते। अस्यां स्थितौ देवा एव शरण्याः। आस्तिकाः वैदिककर्मकाण्डपद्धत्या यथाविधि देवान् उपासते तथा च देवतोद्देशेन पञ्चामृतं फलं दुग्धं दधिमध्वादीनि बहुमूल्यानि वस्तूनि समर्प्य धनमायुः पुत्रं गृहं स्वरक्षां विश्वकल्याणं च याचन्ते। अस्यां स्थितौ सूर्यादिग्रहाणाम्, गायत्रीप्रभृतिमन्त्राणाम्, श्रौतस्मार्तयागानां चानुष्ठानं कुर्वन्ति। प्रार्थयन्ते च -

'तदस्मासु द्रविणं धेहि चित्रम्'[१]

स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः॥[२]

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥

त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्। उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः॥[३]

सामाजिकजीवने देवतानां प्रयोजनं विद्यते, यतस्तु देवा एव विपत्तिकाल आर्तानां रक्षकाः। यदा रक्षकाणां रक्षणोपायाः, सेवकानां सेवाभावनाः, वैद्यानामोषधयः, सहायकानां साहाय्यं चेति सर्वं निष्फलं भवति, तदा लोकाः देवानां शरणं गच्छन्ति। अस्मिन् प्रसङ्गे श्रीमद्भागवतमहापुराणस्य गजेन्द्रमोक्षस्य कथा द्रष्टव्या -

न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम्।

ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम्॥

यः कश्चनेशो बलिनोऽन्तकोरगात् प्रचण्डवेगादभिधावतो भृशम्।

भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि॥[४]

सामाजिकजागरणे, राष्ट्रियसुरक्षाभावनायाञ्च राजनैतिकदृष्ट्याऽपि देवानां योगदानं वर्तते। यदा राष्ट्रं स्वशक्तिप्रदर्शनेऽसमर्थतां प्राप्तं तदा पार्श्ववर्तीनि राष्ट्राणि तदाक्रमन्ति। अस्मिन्नेवार्थेऽप्रतिरथसूक्ते वर्णितेन्द्रस्य पौरुषं राष्ट्रस्य शक्तिप्रदर्शने सहायकं भवति -

स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन। सꣳसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता॥[५]

बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमानः। प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्।[६]

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्॥[७]

---

१ शुक्लयजुर्वेदे २६/३

२ शुक्लयजुर्वेदसंहिता ३६/१३

३ शुक्लयजुर्वेदसंहिता ३/६०

४ श्रीमद्भागवतम् ८/२/३२-३३

५ शुक्लयजुर्वेदसंहिता १७/३५

६ शुक्लयजुर्वेदसंहिता १७/३६

७ शुक्लयजुर्वेदसंहिता १७/४०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थात् अहङ्काररूपस्य रावणस्य सबलस्य विध्वंसनाय गच्छन्तीनां देवसेनानां वानरभल्लूकसेनानामिन्द्रः परमैश्वर्ययुक्तः श्रीरामो नेता प्रणेतास्तु। बृहस्पतिः बृहस्पतितुल्यो लक्ष्मणो, मन्त्रीति शेषः। यज्ञो विष्णववतारः सुग्रीवो दक्षिणत एतु। सोम उमया सहितो रुद्रो हनुमान् पुरः पुरत एतु गच्छतु अभिभञ्जतीनां शत्रुबलं मर्दयन्तीनां यजन्तीनां विजयं कुर्वतीनामासां सेनानां मरुतो मरुत्तुल्यवेगा अङ्गद-नल-नील-द्विविद-मन्दादयः, अग्रं यन्तु गच्छन्तु।[१] देवानामाचरणेन राष्ट्रियनिष्ठायाः, चारित्रिकपवित्रतायाः, आस्तिकतायाश्च भावना जनेषु जायते। यदा यदा मानवेषु राष्ट्रियनिष्ठाया ह्रासो जायते तदा तदा देवानां चरित्रमेव उत्साहवर्धकं सहायकञ्च भवति -

ॐ वृष्णो ऊर्मिरसि, राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्णो ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि॥[२]

अर्थात् हे राजन्, यस्त्वं वृष्णः सुखवर्षकस्य विज्ञानस्य ऊर्मिः प्रापको राष्ट्रदा असि, स्वाहानीत्या राज्यं मे मह्यं देहि। वृष्ण ऊर्मिः सुखवर्षकस्य राज्यस्य ऊर्मिज्ञाता राष्ट्रदा चासि, अमुष्मै राज्यपालकाय न्यायेन प्रकाशितं राज्यं देहि। राष्ट्रदा राज्ञां कर्मप्रदो वृषसेनोऽसि हृष्टपुष्टसेनोऽसि, मे प्रत्यक्षाय मह्यं स्वाहा सुवाण्या राष्ट्रं देहि। राष्ट्रदा वृषसेनोऽसि त्वमुष्मै राष्ट्रं देहि इति। कथञ्च याञ्चा मात्रेण राज्यप्राप्तिः सम्भवति ? दिव्यैश्वर्यसम्पन्नासु देवतासु राज्यदानसामर्थ्ये सत्यपि मनुष्येषु तदसम्भवात्।[३]

सामाजिकचेतनाजागरणहेतवे **संस्कारेषु प्रयुक्तानां देवानां योगदानं** वर्तते। उदाहरणं यथा -

यदा पिता नवजातशिशोः जातकर्मसंस्कारं करोति तदा अनामिकयाऽङ्गुल्या मधुघृतं वा शिशुं प्राशयति, मन्त्रं च पठति - **'ॐ भूस्त्वयि दधामि'**[४] अस्य मन्त्रस्याभिप्रायः - शिशुः जन्मकाले एव गायत्रीछन्दः अश्रृणोत्। पिताऽपि भूमिं प्रार्थयति यत् हे मातृभूमे ! तव शक्तिः मम शिशौ समागच्छतु, यथा तवोपरि जनाः विविधमुपद्रवं कुर्वन्ति परन्तु त्वयि व्यग्रता नहि भवति तथैव चेत् शिशोर्जीवने विविधं झञ्झावातमागमिष्येत् तर्हि तव प्रासादात् मम शिशुः झञ्झावातैः विह्वलो विषादयुक्तो व्यग्रो वा मा भूयात्।

पिता द्वितीये प्राशने मन्त्रं पठति - **'ॐ भुवस्त्वयि दधामि'**[५] अस्मिन् मन्त्रे पिता वायोः प्रार्थयति - भगवन् वायो ! यथा त्वं जगतः जीवनाय सततं प्रवहसि, जीवनरूपम्, प्राणरूपं वायुं च ददासि, तद्वद् मम शिशुः समाजस्य, संस्कृतेः, भाषायाः, धर्मस्य च सेवकः भवेत्, एतदर्थमहं त्वां प्रार्थये।

---

१ मन्त्रभाष्ये अनन्तश्रीविभूषिताः स्वामिकरपात्रमहाराजाः

२ शुक्लयजुर्वेदसंहिता १०/२

३ महर्षिदयानन्दस्य मन्त्रभाष्ये

४ पारस्करगृह्यसूत्रम् १/१६/४

५ पारस्करगृह्यसूत्रम् १/१६/४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयप्राशने मन्त्रं जपति - **'ॐ स्वस्त्वयि दधामि'**[१] मन्त्रेऽस्मिन् सूर्यं स्तौति - भो भगवन् भास्कर ! यथा त्वं प्रकाशं दत्त्वा लोकान् सन्मार्गं गमयितुं प्रेरयसि[२] तद्वद् मम शिशुः समाजस्य, धर्मस्य, भाषायाश्च प्रकाशको भवतु।

चतुर्थप्राशने मन्त्रं जपति - **'ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि'**[३] अर्थात् हे देवाः ! सर्वान् कामान् निखिलाऽऽयुः इच्छाशक्तिं च पूरयन्तु। अत्रैव विचारणीयं यत् सामाजिकजीवने देवतानां प्रयोजनमतिमहत्त्वपूर्णं वर्तते। देवानां पवित्रं चरित्रं प्रदर्श्य तेषां भित्तिं च संस्थाप्य ऋषय आदर्शसंस्कृतेर्भावनां स्थापयितुं प्रयत्नं कृतवन्तः। साम्प्रतं संस्काराणामुपेक्षा देवानां चोपेक्षैव जीवनतत्त्वस्य विस्मृतेः कारणम्।

ममाऽयमभिलाषः, यदद्यतनविकासाभासज्वरोपसङ्क्रान्तविनिद्रभारतस्य श्रवणरन्ध्रेषु संस्कृतिरिक्थलुण्ठनजन्यार्तनादव्यञ्ज्यभावाभिव्यञ्जनमुपजायेत तेनैव पुनरस्य भारतस्य शुष्काधरयोः समुत्पन्नशोणभावैः रसाभिव्यक्तिरभिव्यञ्जिता स्यात्।

डॉ. देवेन्द्रप्रसादमिश्रः
सहायकाचार्यो वेदविभागे
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कुबुतसांस्थानिकक्षेत्रम्, नवदेहली-

१ तदेव
२ सुवति स्व स्व व्यापारे प्रेरयतीति सविता। शुक्लयजुर्वेदसंहिता १/१ म. मं. भा.
३ पारस्करगृह्यसूत्रम्, १/१६/४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 20 वेदविद्या
जुलाई-दिसम्बर 2012 ISSN – 2230-8962

वैदिकछन्दसां वैज्ञानिकं विवेचनं

डॉ. अजयकुमार मिश्रः

भावानामेकत्र संवहनं प्रकाशनमाह्लादनञ्च छन्दसां मुख्यानि तत्त्वानि। अनया दृष्ट्या श्रुतिमाधुर्यलययुक्ता वाणी एव छन्दो नाम्ना अभिधीयते। छन्दयति प्रीणाति रोचते इति छन्दः। यां वाणीं श्रुत्वा एव मनसि आनन्दो जायते तां वाणीं छन्दो नाम्ना विद्वद्भिः आख्यायितः। "नाच्छन्दसि वागुच्चरति" वैदिकसाहित्ये गद्यं पद्यञ्च छन्दः समन्वितमिति सर्वे स्वीकुर्वन्ति। अपौरुषेयशब्दराशिः वेदः छन्दश्शब्देन व्यवहृतो भवति। अनेन स्पष्टीयते यत् सम्पूर्ण-संस्कृतवाङ्मयस्याध्यात्मिकमूलाधारः छन्दसु एव सुरक्षितो विद्यते।

लौकिकसाहित्यस्य कवयः स्वकीयकालजयीमहाकाव्यानि विविधछन्दोभिः समलङ्कृतानि। तेषां काव्येष्वपि छन्दसामाधिभौतिकस्वरूपं दृश्यते। अनेन प्रकारेण भारतीयमनीषिणः छन्दसाम् आधिदैविकाध्यात्मिकाधिभौतिकानि च वैशिष्ट्यानि अङ्गीकृतवन्तः।

छन्दश्शब्दविचारः - छन्दश्शब्दविषये विचारः कृते सति सिद्धान्तद्वयस्य प्राप्तिः जायते।

प्रथमो नैरुक्तसिद्धान्तः, द्वितीयश्च वैयाकरणसिद्धान्तः। निरुक्तकारेण कृता व्युत्पत्तिः "छाद्यते छन्द्यते" वा अनेन इति। वैयाकरणैः "चन्द्यते अनेन" एवं कृता। अनयोः द्वयोः सिद्धान्तयोः शब्दगतप्रकृतिवैशिष्ट्यमेव विचारवैभिन्न्यस्य मूलमस्ति। अपौरुषेयशब्दराशिमधि-कृत्य निरुक्तकारेण व्युत्पत्तिः प्रदर्शिता। परञ्च वैयाकरणाः लौकिकशब्दसङ्घातमधिकृत्येति। तत्र साक्षात् श्रुतिः उपदिशति- **"यदस्मा अच्छदयंस्तस्माच्छदांसि"**[1] अर्थात् येन आच्छाद्यते तच्छन्दः। **"छन्दांसि छन्दयन्तीति"**[2] येन अक्षराणां परिमाणं गण्यते तच्छन्दः। विभिन्नानां भावानां प्रकाशनं सुश्राव्यपद्धत्या छन्दोभिः सम्पद्यते। श्रुतिमाधुर्यकारणादेव छन्दांसि आह्लादमुत्पादयन्ति। यथोच्यते-

स्वच्छन्दः सञ्ज्ञारघटामात्राक्षरसमोदिता।
पादद्वन्द्वसमाकीर्णा सुश्रव्या सैव पद्धतिः॥[3]

---

१ शतपथब्राह्मणम्, ८/२/१
२ ऋक्सर्वानुक्रमणी, २/६
३ जयकीर्तिकृतछन्दोऽनुशासनम्, १/२४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाट्यशास्त्रकारेण उच्यते **"छन्दहीनो न शब्दोऽस्ति न छन्दः शब्दवर्जितम्।"**[१] अनेन प्रतीयते यच्छन्दरहितः कोऽपि शब्द एव नास्ति।

"चन्दति ह्लादं करोति दीप्यते वा श्रव्यतया इति छन्दः।"[२]

छन्दसां विभागः - छन्दसां विभागः द्विविधः कृतः। वैदिकंलौकिकञ्चेति यथा उच्यते **छन्दसामार्षं लौकिकं च।**[3]

वैदिकछन्दसु सप्तछन्दांसि प्रधानानि सन्ति। चतुर्दश अतिछन्दांसि। मुख्यवैदिकच्छन्दांसि (1) गायत्री, (2) उष्णिक्, (3) अनुष्टुप्, (4) बृहती, (5) पङ्क्तिः, (6) त्रिष्टुप्, (7) जगती।

अतिछन्दांसि - (1) अतिजगती, (2) शक्करी, (3) अतिशक्करी, (4) अष्टिः, (5) अत्यष्टिः, (6) धृतिः, (7) अतिधृतिः, (8) कृतिः, (9)प्रकृतिः, (10) आकृतिः, (11) विकृतिः, (12) संकृतिः (13) अभिकृतिः, (14) उत्कृतिः।[४]

आधिदैविकस्वरूपम् - ब्रह्मणः सर्जनात्मिका शक्तिः बहिर्जगति निःसरति। पुनः सा शक्तिः बहितः प्रत्यावर्तनं करोति। सा एकलयेन एव गच्छति। तस्यैव नाम छन्दः वर्तते। छन्दोभ्यः विश्वस्य विवर्तनम् अभवत्। यथोच्यते- **छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत।**[५] अनेन प्रतीयते यद् विश्वमिदं छन्दसां विवर्तनमस्ति। वाचिकछन्दांसि एतेषामेवानुकरणमात्रमिति । सर्वेषां मूलछन्दसां देवतानिर्देशमपि अपौरुषेयवचोभिः समुपदिष्टम् -

अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव।
अनुष्टुभा सोम उक्थैर्महस्वान्बृहस्पतेर्बृहती वाचमावत्॥
विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः।
विश्वान्देवाञ्जगत्या विवेश तेन चाकॢप्र ऋषयो मनुष्याः॥[६]

अनयोः मन्त्रयोः प्रधानत्वेन आधिदैविकतत्त्वमेव वर्णितं कथमिति आधिदैविकजगति गायत्र्यादीनि सप्तछन्दांसि सूर्यस्य सप्तविधरश्मयः सन्ति। अग्निसविताप्रभृतीनि यानि नामानि श्रूयन्ते तानि सूर्यस्य विभिन्नावस्थानां नामानि। याभ्यः रश्मयः प्रादुर्भूताः भवन्ति। वाचिकछन्दांसि आधिदैविकछन्दसां अनुकरणमात्रमेव। आधिदैविकजगति छन्दोभ्यः छन्दसामुत्पत्तिः जायते।

---

१ भरतमुनिकृतनाट्यशास्त्रम्, १४/४५
२ हर्षटकृत जयदेवच्छन्दोविवृतिः, २/१
३ उपनिदानसूत्रम्, १/५
४ छन्दशास्त्र का उद्भव एवं विस्तार, १/११
५ भर्तृहरिकृतं वाक्यपदीयम्, १/१२०
६ ऋग्वेदः, १०/१३०/४-५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आध्यात्मिकस्वरूपम् - अध्यात्मसु अपि वाचिकछन्दसामुत्पत्तेः कारणमिन्द्रः अर्थात् जीवात्मा वर्तते।[१] अयं जीवात्मा बुद्ध्या सर्वान् अर्थान् सञ्चयनेच्छया मनो नियोजयति। यथा - पाणिनीयशिक्षायां - **आत्मबुद्धया समेत्यार्थान् मनो युङ्क्ते विवक्षया**। अनेन प्रकारेण चिन्मनो निस्सृता वाणी एव छन्दो नाम्ना अभिधीयते। छन्दसां सहाय्येनैव सृष्टियज्ञस्य अनुष्ठापनं भवति **"सहच्छन्दस आवृतः।"**[२] मात्रा, यतिस्तथा पादनियमानां फलस्वरूपात् छन्दोभिः श्रुतिसुखदा आनन्दानुभूतिः जायते। नादब्रह्मणः साक्षात्कारस्य कारणं छन्दांसि एव सन्ति।

आधिभौतिकस्वरूपम् - अपमृत्युं वारयितुमाच्छादयतीति छन्दः अर्थात् अपमृत्युवारणाय यदाच्छादनं करोति तच्छन्दः इति सायणाचार्येण निगदितः। अस्याभिप्रायः वर्तते यत् कमपि अपमृत्युना रक्षणाय शब्दैः आवृत्तयति तच्छन्दः। छन्दसु मृत्युभ्यः रक्षणाय शक्तिः वर्तते, तथा अमरत्वप्रदानाय सामर्थ्यमिति। अतः ये छन्दोबद्धाः काव्यपाठं कुर्वन्ति ते अपमृत्युं न प्राप्नुवन्ति। कथमिति चेत् शरीरत्यागानन्तरमपि तेषां कृतिः अमरत्वं प्रयच्छति।

यद् गा॑य॒त्रे अधि॑ गाय॒त्रमाहि॑तं॒ त्रैष्टु॑भाद्वा॒ त्रैष्टु॑भं नि॒रत॑क्षत।
यद्वा॒ जग॒ज्जग॒त्याहि॑तं प॒दं य इत्तद्वि॒दुस्ते अ॑मृ॒तत्वमा॑नशुः ॥[३]

छन्दस्तत्त्वस्य रहस्यज्ञानेन अमृतत्त्वं प्राप्यते। यः कोऽपि मनुष्यः गायत्रमन्तरिक्षे त्रैष्टुभं द्युलोके जगतीछन्दसां प्रतिष्ठापकः कः? इति ज्ञायेत, तर्हि सः देवत्वं प्राप्नोति अस्यां भुवि। परञ्च एतादृशः कोऽपि न वर्त्तते यः सम्पूर्णां छन्दविद्यां ज्ञातुं शक्नोति। अत एव ऋषि उवाच-

कश्छन्द॑सां॒ योग॒मा वे॑द॒ धीरः॒ को धिष्ण्यां॒ प्रति॒ वाचं॑ पपाद।
कमृ॒त्विजा॑मष्ट॒मं शूर॑माहु॒र्हरी॒ इन्द्र॑स्य॒ नि चि॑काय॒ कः स्वि॑त् ॥[४]

वैदिकच्छन्दांसि सृष्टिविज्ञानस्य सूत्ररूपाणि सन्ति। प्राणसृष्टिर्गायत्रीच्छन्दसः ऋचानां समुदायेभ्यः सामवेदस्य, त्रैष्टुभात् यजुर्वाक्यानामेव एवं छन्दोमयीं दिव्यां वाणीं ससृजत।

गा॒य॒त्रेण॒ प्रति॑ मिमीते अ॒र्कम॒र्केण साम॒ त्रैष्टु॑भेन वाकम्।
वा॒केन॑ वा॒कं द्वि॒पदा॒ चतु॑ष्पदाऽक्षरे॑ण मिमते स॒प्त वाणीः॑ ॥[५]

प्रजापतिः सूर्येण द्युलोके जलं स्थापयति। तज्जलं वृष्ट्या पृथिव्यां वर्षति। तदा सूर्यद्युलोकयोः सन्निहितप्राणः जलवृष्ट्या पृथिव्यां समागच्छति। तत्र गायत्रीच्छन्दसः त्रयः पादाः

---

१ पं. युधिष्ठिरमीमांसकविरचिता वैदिकछन्दोमीमांसा, पृ. ४४
२ माध्यन्दिनसंहिता, ३४/४९
३ ऋग्वेदः, १/१६४/२३
४ ऋग्वेदः, १०/११४/९
५ ऋग्वेदः, १/१६४/२४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निर्विद्युत्सूर्यरूपैः (पृथिवीः, द्युलोकः, अन्तरिक्षलोकः) विद्यन्ते। एवमेव अयं प्रजापतिः सृष्टिनिर्माणे दक्षो भवति।

जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्यं पर्यपश्यत्।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा॥[1]

एतानि छन्दांसि सर्वेषां कल्याणाय सन्ति। यदा असुराः देवान् प्रति युद्धाय उद्यताः तदानीमसुरान् विरुद्धं देवानां सहायतार्थं छन्दांसि कार्यमकुर्वन् तदा ते देवाः विजयं प्राप्तवन्तः[2]; एतस्मात् कारणाद् यज्ञेषु छन्दसां महत्त्वं विद्यते। छन्दांसि छादनात्[3] इत्यमुममर्थं पुष्यर्थं दुर्गाचार्येण सारगर्भितं वाक्यम् उद्धृतम् - **यदेभिरात्मानमाच्छादयन् देवा मृत्युर्बिभ्यतः तच्छन्दसां छन्दस्त्वम्।** छन्दांसि एव वेदपुरुषस्य गतिकारकपादाङ्गरूपेण विद्यन्ते। छन्दसाम् आधिदैविकमाध्यात्मिकमाधिभौतिकञ्चेति मानदण्डमधिकृत्य वैदिकदर्शनस्य परिधिं निर्धारयितुं शक्यते।

डॉ. अजयकुमार मिश्रः
सहायक-आचार्यः,
संस्कृतविभागः, विद्यासागरविश्वविद्यालयः,
मेदिनीपुरम् (प.बं.)

१ ऋग्वेदः, १/१६४/२५
२ शतपथब्राह्मणम्, १/४/१/३४
३ निरुक्तम्, ७/१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 20 वेदविद्या
जुलाई-दिसम्बर 2012 ISSN – 2230-8962

वैदिकं रसायनविज्ञानम्

विद्यावाचस्पतिः डॉ.सुन्दरनारायणझाः

विदन्त्येव भवन्तः सर्वे यद्वेदा ह्यस्माकं सर्वस्वम्। वेदास्तु स्वरूपभेदात्त्रिविधाः संहिताभेदाच्च चत्वारः सन्ति। चतसृणामपि ऋग्यजुस्सामाथर्वसंहितानामनेकाः शाखाश्चापि श्रूयन्ते। महाभाष्यकारेण भगवता पतञ्जलिना एकत्रिंशदुत्तरशताधिकसहस्राणां शाखानां समुल्लेखः कृतः। अनेनोल्लेखेनेदं प्रतीयते यत्पतञ्जलेर्गणनाकाले एतावत्य एव वेदशाखा उपलब्धा आसन्। ततः पूर्वं वेदानां शाखा इतोऽप्यधिका आसन्। श्रौतशास्त्रेषु विविधानि प्रामाणिकानि वचनान्युपलभ्यन्ते, येभ्य इदं सुव्यक्तं भवति यत्पूर्वं वेदानामनेकशाखा आसन्। तैत्तिरीयब्राह्मणे तु वेदानामानन्त्यमेवोक्तम्। तद्यथा- **अनन्ता वै वेदाः**[१] इति। अनेन ब्राह्मणवचनेन वेदानामानन्त्यं सिद्ध्यति। एवमेव निरुक्तभाष्येऽपि- **वेदं तावदेकमतिमहत्त्वाद्दुरध्येयं सन्तं तेषामल्यायुषानल्पग्रहणशक्तिकानां सुखग्रहणाय व्यासेनानेकशाखाभेदेन समाम्नातवन्तः**[२] इत्युक्तमस्ति।

इत्थमनन्तरूपसम्पन्नेषु सर्वेष्वपि वेदेषु विविधज्ञानविज्ञानविषयाः प्रतिपादिताः सन्ति। अत इदमुच्यते यद्वेदेषु सर्वविद्यानां सूत्राणि विद्यमानानि सन्ति। तदुक्तम्मनुना - **सर्वज्ञानमयो हि सः**[३] इति। तत्र विशेषरूपेणेदमवधेयमस्ति यज्जगति समस्तविद्यानां द्विविधमेव स्वरूपम् - ज्ञानं विज्ञानञ्च। तत्र ज्ञानं मुक्तिजनकत्वादपवर्गसिद्धिसाधनत्वाच्च ब्रह्मविद्येत्यपरनाम्ना ज्ञायते। विज्ञानञ्च चतुर्विधपुरुषार्थेषु वर्गफलप्राप्तिनिमित्तत्वादैहिकसुखसाधनोपायभूतत्वाच्च यज्ञविद्येत्यपरनाम्ना विख्यातमस्ति। तदुक्तं श्रुतिषु- **विज्ञानं यज्ञं तनुते**[४] इति। विज्ञानविषये अमरकोशकारेणाप्युक्तम्- **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः**[५]। अर्थात् मोक्षप्राप्त्यर्थं निःश्रेयसजनकं धर्मकर्मादिकं ज्ञानमित्युच्यते। विज्ञानन्तु शिल्पशास्त्रादिषु प्रवर्तते। शिल्पस्य परिभाषा श्रौतग्रन्थेष्वेवं प्राप्यते **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति**[६] इति। तथा चावादि शतपथश्रुतिः **यद्वै प्रतिरूपं तच्छिल्पम्**[७] इति। कथनस्यास्य तात्पर्यमिदमस्ति यदात्मसंस्कारो नाम शिल्पत्वम्। आत्मसंस्कारश्च कर्मविशेषः, स च कर्मव्यापारः यज्ञेष्वेव

---

१ तै.ब्रा. ३/१०/११/३
२ निरुक्तभाष्ये १/६/२० (मुकुन्दझाबख्शीकृतटीकायाम्)
३ मनुस्मृतौ २/७
४ तै. उप. २/५/१
५ अमरकोशे धीवर्गे
६ गोपथब्राह्मणे २/६/७
७ श.प. ब्रा. ३/२/१/५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति। यथोक्तं भगवता श्रीकृष्णेन **यज्ञः कर्मसमुद्भवः**[१] इति। यज्ञेषु विविधानां रासायनिकतत्त्वानां प्रयोगो भवति। विविधानां रसानां मिश्रितं रूपं रसायनम्। रसस्यायनं रसायनमिति विग्रहेण सिद्ध्यति। तैश्च रसैः यत्कार्यं सम्पद्यते तत्कृत्यं रासायनिकमित्युच्यते। रसविषये श्रौतग्रन्थेष्वेवमुक्तम् - **रसो वृष्टि**[२]रिति मैत्रायण्याम्। **रस ओङ्कारः**[३] इति जैमिनीये। **रसेनापः**[४] इति च जैमिनीये।

एवमुपर्युक्तासु निरुक्तिषु **रस** इत्यनेन शब्देनापां प्रति सङ्केतो मिलति। अत एव रसायनविज्ञानान्तर्गतं ये विषयाः चिन्त्यन्ते तेषु मुख्यरूपेणापामुत्पत्तिः अपां महत्त्वम्, अपां गुणाः, अपां भेदाः, अद्भिः सृष्टिः, विविधाः धातवः, तेषां मिश्रणं, धातूनां विविधोपयोगः, लवण-जल-रत्नानां चौषधिरूपेणोपयोगश्चेत्यादीनां विषयाणां वर्णनानि भवन्ति। अत्र केषाञ्चन महत्त्वपूर्णानां सूत्राणामुल्लेखः क्रियते। तत्रादावपामुत्पत्तिविषये विचार्यते।

अपामुत्पत्तिः

आपः, जलम्, सलिलम्, इमे सर्वे शब्दाः परस्परं पर्यायाः। अपामुत्पत्तौ अग्नीषोमौ बीजरूपावुक्तौ। यथोक्तमथर्वे - **अग्नीषोमौ विभ्रति आप इत् ताः**[५] इति। इमावेवाग्नीषोमावृग्वेदे मित्रावरुणावुक्तौ। तदुक्तमपि - **मित्रं हुवे पूतदक्षं वरुणञ्च रिशादसम्। धियं घृताचीं साधन्ता**[६] इति। अत्रोभयोः मन्त्रयोरुक्ताभ्यामग्निमित्रशब्दाभ्यां यस्य तत्त्वस्य बोधो भवति तमेव तत्त्वमाधुनिकवैज्ञानिका **ऑक्सीजन** (Oxygen) पदेन व्यवहरन्ति। सोमवरुणाभ्यां शब्दाभ्यां च यस्य तत्त्वस्य बोधो भवति, **तं हाइड्रोजन** (Hydrogen) इति पदेन व्यवहरन्ति। तयोर्द्वयोः तत्त्वयोरॉक्सीजनहाइड्रोजनयोः सम्मेलनेन अपामुत्पत्तिर्भवतीति स्फुटं भवति।

वस्तुतो वेदेषु पारिभाषिकशब्दानां प्रयोगबाहुल्यमस्ति। पारिभाषिकशब्दानामर्थज्ञानं यद्यपि कठिनं भवति तथापि वैदिकविज्ञानदृष्ट्या तादृशानां शब्दानामर्था अत्र प्रदर्श्यन्ते। वेदेष्वग्निर्मित्रो वैश्वानरोऽग्निः मातरिश्वा च प्राणस्वरूपा उक्ताः सन्ति। तदुक्तं श्रुतिषु - **प्राणो वा अग्निः**[७] **प्राणो वै मित्रः**[८] **प्राणो वै पूर्वो वैश्वानरोऽपान उत्तरः**[९] **प्राणो मातरिश्वा**[१०] इति। सोमो जलमापः सलिलं

---

१ श्रीमद्भगवद्गीतायाम् ३/१४
२ मैत्रायण्याम् २/५/७
३ जै. उप. २/७८
४ जै. उप. १/७
५ अथर्वसंहितायाम् ३/१३/५
६ ऋ. सं. १/२/७
७ श. प. ब्रा. २/२/२/१५
८ तै. सं. ५/३/४/२
९ जै.ब्रा. ३/८
१० ऐ.ब्रा. २/३८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरुणश्चापानस्वरूप उक्तः। यथा - **अपानेन वै प्राणो धृतः**[१] इति। अर्थादपानस्वरूपैः सोमादिपदार्थैरेवाग्निमित्रादयः प्राणस्वरूपास्सन्तः स्वस्वरूपेषु स्थिता भवन्ति। अत एवोक्तमथर्ववेदे -

सोमेनादित्या बलिनः सोमेन पृथिवी मही। अथो नक्षत्राणामेषामुपस्थे सोम आहितः॥[२]

इत्यनेन मन्त्रेणेदं स्फुटं भवति यत्सोमगततत्त्वानामाधारेणैवादित्यो बलवान् भवति। यतस्त्वादित्यशब्दस्य निर्वचनं कुर्वता यास्काचार्येणोक्तम् - **आदत्ते रसानादत्ते भासं ज्योतिषाम्**[३] इति। अर्थादसावादित्यः रश्मिभिः रसानादत्ते। ज्योतिषां ग्रहनक्षत्राणां प्रकाशमादत्ते। तदुदये हि चन्द्रतारकादीनां प्रभानाशो भवत्येव। रसविषये पूर्वं बहूक्तम्, तेन पार्थिवपदार्थेषु सर्वत्र रसस्योपस्थितिः स्पष्टी भवति। अर्थादादित्यः स्वरश्मिभिः रसरूपस्य सोमतत्त्वस्यादानं करोति येन तस्य बलमुपचीयते। सौमिकानि तत्त्वान्येवाधुनिकैर्वैज्ञानिकैः हाइड्रोजनमिति नाम्ना व्यवह्रियन्ते। तस्मादुच्यते यत्सूर्ये नवतिप्रतिशतं हाइड्रोजनतत्त्वम्, अष्टप्रतिशतं हीलियमतत्त्वम्, प्रतिशतद्वयञ्चान्यं द्रव्यं वर्तत इति ते स्वीकुर्वन्ति। अस्य तथ्यस्य मूलं स्वरूपं शुक्लयजुर्वेदस्यैकस्मिन्मन्त्रे इतोऽपि विस्तृतरूपेणोपलभ्यते यत इमे वैज्ञानिका अस्य तथ्यस्य ज्ञानं लब्धवन्त इति। वस्तुतः पाश्चात्याः यदा भारतभुवि समागतवन्तस्तदानीमत्रत्यं ज्ञानविज्ञानात्मकं कौशलमत्यन्तमुन्नतमासीदित्यपि स्फुटं भवति। तद्यथा -

अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम्।
अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तमम्॥[४]

मन्त्रेऽस्मिन् हाइड्रोजनमिति तत्त्वनिमित्तमपां **रसमिति** पदस्य प्रयोगोऽस्ति, अर्थाज्जलस्य यः सारभागः स हाइड्रोजनपदार्थरूपः, तस्यापि च सारभागः **अपाꣳ रसस्य यो रसस्स** हीलियमपदार्थ इत्युच्यते। एते द्वेऽपि तत्त्वे सूर्ये सदा विद्यमाने भवतः। एतदर्थं **सूर्ये सन्तꣳ समाहितम्** इत्यस्य शब्दस्य प्रयोगोऽत्र दृश्यते। मन्त्रानुसारमपां साररूपः पदार्थः प्रभूतमात्रायां भवति तस्य च सारभागस्तस्मादल्पतरो लभ्यत इति तु सिद्धमेव। तस्मादत्रापि हाइड्रोजनतत्त्वस्याधिक्यां मात्रायां हीलियमतत्त्वस्याल्पमेव मिश्रणमुपदिष्टमस्माकमृषिभिस्तत्त्व-दर्शिभिश्च।

बृहज्जाबालोपनिषदि- **अग्नीषोमात्मकञ्जगत्**[५] इत्युक्तमस्ति। अर्थाज्जगति सर्वत्र अग्नीषोम-योरुपस्थित्यैव जगतः समस्तप्रक्रिया चलति। ऐतरेयेणापि **प्राणापानावग्नीषोमौ**[६] इत्युक्तम्। अत्राग्निपदेन ऑक्सीजनतत्त्वस्य, सोमपदेन च हाइड्रोजनतत्त्वस्य बोधो जायते। तावग्नीषोमौ

---

१ मैत्रायण्याम् ४/५/६
२ अथर्वसंहितायाम् १४/१/२
३ निरुक्ते २/४/१३
४ शु.य.सं. ९/३
५ बृ.जा. उप. २/४
६ ऐ.ब्रा. १/८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बीजभूतौ जले तिष्ठतः। तच्च सूत्रम् - H_2O इति। अत्र भागद्वये हाइड्रोजनतत्त्वे भागमेकं ऑक्सीजनतत्त्वं यदा मिश्रितं भवति तदा जलतत्त्वस्योत्पत्तिर्भवतीति स्फुटं भवति।

वैदिक्यां परिभाषायां जलशब्दस्य कृते वशिष्ठशब्दस्य प्रयोगोऽस्ति। तदुक्तं शतपथश्रुतौ - **प्राणो वै वशिष्ठ ऋषिः**[१] इति। अर्थात्प्राणापानाभ्यामेव जगतो मूलसृष्टिर्भवतीत्युक्तं प्राक्। तत्राग्निः प्राणमयः सोमश्चापानरूपः, तयोरुभयोः प्राणापानयोः मिश्रणेन यन्निर्मीयते तत्तत्त्वं वशिष्ठशब्देन बुध्यते। तस्माद्वशिष्ठः प्राणस्वरूप एवोक्तः। तदुक्तमृग्वेदे - **उतासि मैत्रावरुणो वसिष्ठ ऊर्वश्या ब्रह्मन् मनसोऽधि जातः।**[२] मन्त्रेऽस्मिन् **उर्वशी**शब्देन न काचिद्देवाङ्गना (अप्सरा) लक्षितास्ति, अपितु उरौ विस्तीर्णे क्षेत्रेऽन्तरिक्षे वशी व्याप्ताऽस्तीत्युर्वशी एतादृशोऽर्थो ज्ञेयः। अर्थादन्तरिक्षे मित्रावरुणयोः संयोगेन वशिष्ठरूपस्य जलस्योत्पत्तिर्भवतीति ज्ञायते। शतपथश्रुतौ - **आपो वै प्राणाः**[३] इत्युक्तम्। तेनापः प्राणरूपाः, वशिष्ठोऽपि प्राण एवोक्तः अर्थादव्वशिष्ठयोरैक्यं सिध्यति। आपः शब्दस्य निर्मितिः **आप् लृ व्याप्तौ** धातोः भवति। तस्मादपां सर्वव्यापकत्वात्प्राणस्य वशिष्ठस्य च सर्वव्यापकत्वं स्पष्टमेव।

अग्नीषोमात्मके जगति यद्यप्यग्निरेव प्राणरूपतया प्रधानभूतः, तथापि सोमतत्त्वं सर्वत्र व्याप्तम्। तद्धि केन्द्रबद्धमपि प्रत्यृतमिति ऋतम् इत्युच्यते। अग्निस्तद्गर्भे तिष्ठति। सोमस्यैव तिस्रोऽवस्थाः सोमः, आपो, वायुरिति। एषामपामपि व्याप्तिमनुपदं श्रुतिराह। यथा - **आपो भृग्वङ्गिरो रूपमापो भृग्वङ्गिरोमयम्।**[४] इत्यस्मिन्मन्त्रे अप्सु भृग्वङ्गिरयोरुपस्थितिरुक्ता। भृगुशब्देनात्र हाइड्रोजनतत्त्वस्य बोधो जायते। यतस्तु वरुणो ह्यपानरूपः सोमरूपो वेत्युक्तः। तस्माद्वरुणादस्य भृगोरुत्पत्तिरभवदित्युक्तं श्रुतौ। यथा - **वरुणस्य वा अभिषिच्यमानस्येन्द्रियं वीर्यमपाक्रामत, तत्त्रेधाऽभवद्, भृगुस्तृतीयमभवत, श्रान्तीयं तृतीयं सरस्वतीं तृतीयं प्राविशत्**[५] इति। अर्थाद्वरुणात्सोमरूपत्वाद् भृगोरुत्पत्तिस्तस्माद् भृगोः सोमरूपत्वं सिध्यति। अङ्गिरा चाग्निरूपः। तदुक्तमपि श्रुतौ - **अङ्गिरा उ ह्यग्निः**[६], **अङ्गिरा वाऽग्निः**[७] इति च। अतोऽग्नीषोमयोः भृग्वङ्गिरारूपेणात्र वर्णनेनापामन्तः भृग्वङ्गिरयोरुपस्थितिः सुस्पष्टम्, तेन भृगोः हाइड्रोजन तत्त्वात्मकं स्वरूपम्, अङ्गिरसश्चॉक्सीजनतत्त्वात्मकं स्वरूपम्, उभयोः संयोगेनापः सिध्यति। अतोऽनेन विवेचनेनाधुनिकानां H_2O सिद्धान्तः वैदिकविज्ञानानुसृत एव स्फुटो भवति।

---

१ श.प.ब्रा. ८/१/१/६
२ ऋ. सं. ७/३३/११
३ श. प. ब्रा. ३/८/२/४
४ गोपथब्राह्मणे पू. १/३९
५ मैत्रायण्याम् ४/३/९
६ श.प.ब्रा. १/४/१/२५
७ श.प.ब्रा. ६/४/४/४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपां महत्त्वम्

वेदेष्वेतादृशं वर्णनमुपलभ्यते यज्जले सर्वासां देवतानां निवासोऽस्ति। यथा - **आपो वै सर्वा देवताः**[१] इति। तस्मादेव कारणाज्जलं देवालयमित्युच्यते। जलस्याधार एव सम्पूर्णं रसायनविज्ञानं स्थितमस्ति। जले देवाः सर्वदा सन्नद्धाः भवन्ति तस्माज्जले इच्छानुसारं यस्मिन् कस्मिन्नपि काले परीक्षणं कर्तुं शक्यते। यथा - **यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत**[२] तथा **प्रविष्टा देवाः सलिलान्यासन्**[३] इति च। आभ्यां मन्त्रांशाभ्यामिदमपि विज्ञायते यज्जलस्य प्रत्येकासु कणिकासु छिद्राणि भवन्ति। तस्मादेव कारणाज्जले शर्करालवणादिकञ्च स्वीयां कणिकां प्रवेशयित्वा मिश्रितं भवति। अथर्ववेदस्य **प्रविष्टा देवा सलिलानि** इत्यनेन मन्त्रेणेदमपि सुव्यक्तं भवति यज्जलमखण्डमविभाज्यमविभक्तञ्च नास्ति। तदुक्तमृग्वेदे - अत्रा वो नृत्यतामिव मन्त्रेणेदमपि सुव्यक्तं भवति यज्जलमखण्डमविभाज्यमविभक्तञ्च नास्ति। तदुक्तमृग्वेदे - **अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत**[४] इति।

अर्थादप्सु सर्वदेवताः स्थिताः सन्तः नृत्यमपि कुर्वन्ति, यथा भूलोके जीवानां नृत्यवशाद्रेणवो वायुमण्डले दृश्यन्ते तथैवाप्स्वपि देवतानां नृत्यलीलया रेणवो तीव्रा भवन्ति।

आङ्ग्लेन विदुषा लार्डकेल्विनेन कठिनेन परिश्रमेणेदं ज्ञातं यज्जलस्यैकस्मिन् विन्दौ 10^{24} मॉलिक्यूल रेणवो भवन्ति। ता रेणवः प्रतिक्षणं तत्र नृत्यं कुर्वन्ति, नृत्यमिदमीश्वरीयलीलाया एकोंऽशः। ता आपः सर्वौषधिरूपेण प्रयुक्ता भवन्ति। सर्वविधानां रोगाणां चिकित्सा चाप्यद्भिः कर्तुं शक्यते। तदुक्तमथर्वे -

आप इद् वा उ भेषजीरापो अमीवचातनीः। आपो विश्वस्य भेषजीस्तास्त्वा मुञ्चन्तु क्षेत्रियात्॥[५]

मन्त्रेऽस्मिन् आपो विश्वस्य भेषजी'त्युक्ताः। अर्थात् सम्पूर्णेऽस्मिन् विश्वमण्डले ये के च रोगाः सन्ति ते सर्वेऽप्यपां प्रयोगेण नश्यन्ति। यथा हिमालयात् प्रस्रवन्तीनां नदीनामापो विशेषेण हृद्रोगाय श्रेष्ठतमौषधीरुक्तास्ति। तदुक्तमथर्वे -

हिमवतः प्र स्रवन्ति सिन्धौ समह सङ्गमः। आपो ह मह्यं तद्देवीर्ददन् हृद्योतभेषजम्॥[६]

तथा चेमा आपः समस्तेभ्यः चराचरेभ्यः जीवेभ्यः तत्रापि विशेषरूपेण मानवेभ्यो जीवनं प्रयच्छन्ति। अर्थान्मानवानां जीवनस्याधाररूपाः सन्ति। यत अपां विना मानवानां जीवनमसम्भवमेव। भवति। तद्यथा -

ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम्॥[७]

---

१ तै.सं. २/६/८; ऐ.ब्रा. २/१६
२ ऋ. सं. १०/७२/६
३ अथर्वसंहिता १०/८/४०
४ ऋ. सं. १०/७२/६
५ अथर्वसंहितायाम् ३/७/५
६ अथर्वसंहितायाम् ६/२४/१
७ अथर्वसंहितायाम् १/५/४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वमेवोक्तं यदप्स्वग्नीषोमयोः व्याप्तिरस्ति। तत्राग्नेयेन तत्त्वेन इमा आपः प्राणशक्तिं सोमीयेन च तत्त्वेन तेजस्विताञ्च प्रयच्छन्ति। तद्यथा -

आपो भद्रा घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत् ताः।
तीव्रो रसो मधुपृचामरङ्गम आ मा प्राणेन सह वर्चसा गमेत्॥[१] इति

अपां गुणाः

पदार्थानां क्लेदनं दोषाणामपसारणञ्चास्याः मुख्यो गुणः। तर्कसङ्ग्रहे अपां लक्षणमेवमुक्तम् - **शीतस्पर्शवत्य आपः। ताः द्विविधाः। नित्या अनित्याश्च। नित्याः परमाणुरूपा अनित्याः कार्यरूपाः। पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसनं रसग्राहकं जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।**[२] किञ्चाथर्ववेदे शारीरविज्ञानदृष्ट्या इदमुक्तं यच्छरीरे अष्टविधा आपो भवन्ति। ताः यथा -

अस्थि कृत्वा समिधं तदष्टापो असादयन्। रेतः कृत्वाज्यं देवाः पुरुषमाविशन्॥
या आपो याश्च देवता या विराड्ब्रह्मणा सह। शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः॥
सूर्यश्चक्षुर्वातः प्राणं पुरुषस्य वि भेजिरे। अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये॥
तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते। सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते॥[३]

अर्थाद्रस-रक्त-मांस-मेद-अस्थि-मज्जा-वीर्य-गर्भाश्चैतानि शारीरिकतत्त्वानि त्वपामेव विभिन्नानि रूपाणि सन्ति।

अपां भेदाः

वेदेष्वपामनेक आश्रया उक्ताः सन्ति। यत्र-यत्र जलं तिष्ठति तत् तत् स्थानं जलस्याश्रयरूपमुक्तम्। प्राप्तिस्थानाधारेण जलस्यानेके भेदाः सन्त्युल्लिखिताः। ताः यथा - **शं न आपो धन्वन्याः शमु सन्त्वनूप्याः। शं नः खनित्रिमा आपः शमु याः कुम्भ आभृताः शिवा नः सन्तु वार्षिकीः॥**[४]

अपो देवीरुपह्वये यत्र गावः पिबन्ति नः। सिन्धुभ्यः कर्त्वं हविः॥[५]
शं त आपो हैमवतीः शमु ते सन्तूत्स्याः। शं ते सनिष्यदा आपः शमु ते सन्तु वर्ष्याः॥[६]

उपर्युक्तेषु मन्त्रेषूक्तानामपामाश्रयाणां माध्यमेनापां भेदाः प्रदर्श्यन्ते। यथा -

१. **धन्वन्याः** - शुष्कप्रदेशात् प्राप्यमाणा आपः।
२. **अनूप्याः** - गर्तात् प्राप्यमाणा आपः।

---

१ अथर्वसंहितायाम् ३/१३/५
२ तर्कसङ्ग्रहे प्रत्यक्षपरिच्छेदे
३ अथर्वसंहितायाम् ११/८/२९-३२
४ अथर्वसंहितायाम् १/६/४
५ अथर्वसंहितायाम् १/४/३
६ अथर्वसंहितायाम् १९/२/१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. **वार्षिकीः (वर्ष्याः)** - वृष्ट्या लभ्यमाणा आपः।

४. **हैमवतीः** - हिमालयपर्वतात् प्रस्रवतीनां नदीनामापः।

५. **उत्स्याः** - निर्झरादिभ्यः स्रोतेभ्यः प्राप्यमाणा आपः।

६. **सनिष्यदाः** - निरन्तरं प्रवहमाणा आपः।

७. **सैन्धवाः** - सिन्धुभ्यः (नदीभ्यः) प्राप्यमाणा आपः।

८. **समुद्रियाः** - समुद्रेभ्यः प्राप्यमाणा आपः।

आसु सर्वविधास्वप्सु **पर्जन्यं शतवृष्ण्यम्**[१] इत्यनेन वचनेन वृष्ट्युदकं सर्वोत्तमं शतगुणितं शक्तिसम्पन्नञ्चोक्तम्। शुक्लयजुर्वेदे तैत्तिरीयसंहितायाञ्च अपामितोऽप्यधिकानां भेदानामुल्लेखो वर्तते। यथा - **नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च। नमः कूप्याय चाऽवट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च॥**[२]

ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा[३] इति च।

तत्र स्रुत्याः लघुगर्तस्था आपः, पथ्याः पथि विद्यमाना आपः, काट्याः क्षुद्रनलिकासु विद्यमाना आपः, नीप्याः पर्वतसीमान्तप्रदेशेषु विद्यमाना आपः, कुल्याः क्षुद्रनदीस्था आपः, सरस्या तडाग-सरोवरस्था आपः, नादेयाः गङ्गायमुनादिषु नदीषु प्रवहमाणा आपः, वैशन्ताः लघुतडागवाप्यादिस्था आपः, कूप्याः कूपेषु भवा आपः, अवट्याः क्षुद्रकूपस्था आपः, ह्रद्याः विशालसरोवरस्था आपः, सूद्याः महापङ्कस्था आपः।

शतपथब्राह्मणे अपां सप्तदशभेदाः प्रदर्शितास्ते यथा - **ता वा एताः सप्तदशापः सम्भरन्ति सप्तदशो वै प्रजापतिः।**[४] ताश्च सप्तदशविधा आपः सारस्वतीः, ऊर्मीः, स्यन्दमानाः, अपयतीः, समुद्रियाः, निवेष्याः, स्थावराः, आतपवर्ष्याः, वैशन्तीः, कूप्याः, प्रुष्वाः, मधव्याः, गोरुल्व्याः, पयस्याः, विश्वभृतः, मरीचिः, स्वराजश्चोक्ताः। अत्रापां स्तुतिः प्रजापतिरूपेण प्रस्तुताऽस्ति।

तस्मादुक्तं तैत्तिरीयारण्यके - **नाप्सु मुत्रपुरीषं कुर्यात्। न निष्ठीवेत्। न विवसन स्नायात्। गुह्यो वा एषोऽग्निः। एतस्याग्नेरनतिदाहाय।**[५] अनेन श्रुतिवचनेनापां मध्ये अग्निः गुप्तरूपेण तिष्ठतीत्यपि सिद्ध्यति। उपर्युक्तेष्वपां विविधभेदेषु दूषिताः, सूद्याभ्यश्च प्राप्यमाणा आपो निषिद्धाः (अग्राह्याः) सन्ति। अन्याश्चापो ग्राह्या औषधिरूपेण प्रयुक्ताश्च भवन्ति।

शुक्लयजुर्वेदे- **अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयामि**[६] इति मन्त्रोऽस्ति। अत्र **इमन् ओद्मन्** इत्युभाभ्यां शब्दाभ्यामपां स्थूलसूक्ष्मयोः द्वयोः स्वरूपयोः निर्देशोऽस्ति। शतपथब्राह्मणे

---

१ अथर्वसंहितायाम् १/३/१

२ शु.य. संहितायाम् १६/३७-३८

३ तै.सं. ७/४/१३

४ श.प.ब्रा. ५/३/४/२२

५ तै. आरण्यके १/२६/७

६ शु. य.सं. १३/५३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य मन्त्रस्य सहेतुकार्थो यथा - **अपां त्वेमन् सादयामि, वायुर्वा अपामेम। अपां त्वोद्मन् सादयामि, ओषधयो वा अपामोद्म। अपां त्वा भस्मन्त्सादयामि, अभ्रं वा अपां भस्म। अपां त्वा ज्योतिषि सादयामि, विद्युद्वा अपां ज्योतिः। अपां त्वाऽयने सादयामि, इयं (पृथिवी) वा अपामयनम्। अर्णवे त्वा सदने सादयामि, प्राणो वा अर्णवः। समुद्रे त्वा सदने सादयामि, मनो वै समुद्रः। सरिरे त्वा सदने सादयामि, वाग्वै सरिरम्। अपां त्वा क्षये सादयामि, चक्षुर्वा अपां क्षयः। अपां त्वा सधिषि सादयामि, श्रोत्रं वा अपां सधिः। अपां त्वा सदने सादयामि, द्यौर्वा अपां सदनम्। अपां त्वा सधस्थे सादयामि, अन्तरिक्षा वा अपां सधस्थम्। अपां त्वा योनौ सादयामि, समुद्रो वा अपां योनिः। अपां त्वा पुरीषे सादयामि, सिकता वा अपां पुरीषः। अपां त्वा पाथसि सादयामि, अन्नं वा अपां पाथः।**[१] इत्येतेन विवेचनेनेदं स्फुटं भवति यदापः भूर्भुवस्स्वर्लोकेषु सर्वत्र विद्यमानाः सन्ति। **आप्लृव्याप्तौ** इत्यस्मात्सर्वव्यापकार्थकाद्धातोर्विनिर्मितोऽयमापः शब्दः तत्त्वतया त्रयाणामपि लोकानामाधारस्वरूपास्सन्तीति।

अद्भ्यः सृष्ट्युत्पत्तिः

अप्सु सर्वेषामपि तत्त्वानां (देवानां) समुपस्थितिरस्ति, तस्मादप्स्वेव प्रथमं सृष्टेर्बीजं परमात्मना स्थापितम्। तदुक्तमृग्वेदे - **तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे।**[२] यजुर्वेदेऽपि तदेव भावं प्रकटयन् उक्तमस्ति यदप्स्वेव प्रथमं सृष्टेर्बीजवपनमभवत् तत अग्नेरुत्पत्तिरभवत्। तद्यथा - **आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्**[३] इति। अत इमा आपः समस्तानामपि चराचरात्मकानां जीवानां जगतश्च जननीत्युक्ताः। तथोक्तमृग्वेदे - **आपः....विश्वस्य स्थातुर्जगतो जनित्रीः**[४]; यजुर्वेदेऽपि च - **आपो अस्मान्मातरः**[५] इति।

अद्भ्योऽग्नेरुत्पत्तिः

वेदमन्त्रेष्वग्निः क्वचिद् **अपां नपाद्** अपां प्रजा (पुत्रपौत्रनप्त्रादि) उक्तः। आपश्चाग्नेः जननीरूपेण स्तुताः। क्वचिदग्निरपां पित्तरूपेण वर्णितोऽस्ति। अर्थादपां घर्षणेन, मन्थनेन चाग्निरुत्पद्यत इत्यपि स्पष्टरूपेणोक्तम्। यथा - **अपां नपाद् यो वसुभिः सह प्रियः।**[६]; **तमापो अग्निं जनयन्त मातरः।**[७]; **अग्ने पित्तमपामसि।**[८] इति च। ऋग्यजुषोश्चेदं वर्णितमस्ति

---

१ श.प.ब्रा. ७/५/२/४६-६०
२ ऋ.सं. १०/८२/६
३ शु.य.सं. २७/२५
४ ऋ.सं. ६/५०/७
५ शु.य.सं. ४/२
६ ऋ.सं. १/१४३/१
७ ऋ.सं. १०/९१/६
८ अथर्वसंहितायाम् १८/३/५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्परमवैज्ञानिकेनाथर्वानामकेन ऋषिणा सर्वप्रथमं तडागस्थामपां मन्थनेनाग्निरुत्पादितः। तद्यथा- **त्वामग्ने पुष्करादधि अथर्वा निरमन्थत।**[१] **अथर्वा त्वा प्रथमो निरमन्थदग्ने।**[२] इति च।

आधुनिकविज्ञानानुसारं रसायनविज्ञानस्य तिस्रो मुख्याः शाखाः मन्यन्ते। ताः यथा (क) **भौतिकं रसायनम्** (physical chemistry); (ख) **अकार्बनिकं रसायनम्** (inorganic chemistry); (ग) **कार्बनिकं रसायनम्** (organic chemistry) च। यद्यपि वैदिकसाहित्ये एतादृशं विभाजनं तु नोपलभ्यते तथापि आधुनिकवैज्ञानिकव्यवस्थानुसारमत्रैतेषां विषयाणां कानिचिद् विवरणानि प्रस्तूयन्ते।

(क) भौतिकं रसायनम् (physical chemistry) - शाखायामस्यां भौतिकजगतः प्रादुर्भावविषयस्य (उत्पत्तेः) चर्चा भवति। वेदेषु नासदीयसूक्तम्, पुरुषसूक्तम्, हिरण्गर्भसूक्तम्, दाक्षायणीसूक्तञ्च सृष्ट्युत्पत्तिविषयकं वर्णनं प्रस्तौति। ऋग्वेदे अदितेः सकाशाद्दक्षस्य दक्षाच्चास्याः सृष्टेरुत्पत्तिक्रमो वर्णितोऽस्ति।[३]

(ख) अकार्बनिकं रसायनम् (inorganic chemistry) - अकार्बनिकरसायनान्तर्गतं धातुजरसायनस्य वर्णनं भवति, तच्च वेदेषु प्रचुरेण व्याख्यातम्। यथा - मणिकारः, हिरण्यकारः, अयस्तापः, इषुकारः, अञ्जनीकारादीनामुल्लेखः शुक्लयजुषः त्रिंशत्तमेऽध्याये मिलति। विविधधातुभिः अस्त्रशस्त्रनिर्माणविषयकं वर्णनमपि वेदेषूपलभ्यन्त एव। धातूनां नामानि अपि मन्त्रेषूक्तानि, यथा - **हिरण्यञ्च मेऽयश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम्**[४] इति। त्रयाणां धातूनां मिश्रणेन वस्तुविन्यासवर्णनमपि वेदेषूपलभ्यते। यथा - **हरिते त्रीणि, रजते त्रीणि, अयसि त्रीणि तपसाविष्ठितानि**[५] इति। तत्रापि एकेन धातुना निर्मितस्य वस्तुनः सञ्ज्ञा **एकवृत्**, द्वाभ्यां धातुभ्यां (द्वयोः मिश्रणेन) **द्वितः द्विवृद्वा**, त्रयाणां धातूनां मिश्रणेन च **त्रिवृत्** वस्तुर्भवति। तद्यथा - **त्रयः पोषाः त्रिवृति श्रयन्ताम्**[६] इति। धातूनां परिशुद्ध्यर्थं या प्रक्रिया भवति तस्याः पारिभाषिकं नाम - **दक्ष** इत्यस्ति। अत एव विशुद्धस्य हिरण्यस्य नाम **दाक्षायणं हिरण्यम्** इति भवति। तदुक्तमथर्वे - **यो बिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः।**[७] यजुर्वेदे च - **यदा बध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः। तन्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम्॥**[८] अर्थाद्यः कश्चिदपि विशुद्धं स्वर्णनिर्मितमाभूषणं धारयति स दीर्घायुं, वर्चं, बलवृद्धिञ्चाप्नोती' -त्युक्तम्। एवमेवान्येष्वपि मन्त्रेषु धातुभिः विनिर्मितान्याभूषणानि

---

१ ऋ.सं. ६/१६/१३; शु.य.सं. ११/३२

२ शु.य.सं. ११/३२

३ अदितेर्दक्षो अजायत दक्षाद्वदितिः परि॥ ऋ. सं. १०/७२/४

४ शु.य.सं. १८/१३

५ अथर्वसंहितायाम् ५/२८/१

६ अथर्वसंहितायाम् ५/२८/३

७ अथर्वसंहितायाम् १/३५/२

८ शु.य.सं. ३४/५२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्त्रशस्त्रादीनि च वर्णितानि सन्ति। यथा - **अयस्मयान् वि चृता बन्धपाशान्**[१], **अयस्मये द्रुपदे**[२], **ऋष्टीरयस्मयीः**[३], **ऋष्टीर्हिरण्ययीः**[४], **हिरण्यनिर्णिगुपरा न ऋष्टिः**[५], **तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा**[६], **अयस्मयेनाङ्केन द्विषते त्वा सजामसि**[७] इति।

ब्राह्मणग्रन्थेषु उपनिषत्स्वपि च एकेन धातुना अपरं धातुं बन्धनस्य (योजनस्य) विधिर्वर्णितोऽस्ति। यथा - **लवणेन सुवर्णं सन्दध्यात् सुवर्णेन, रजतं रजतेन, लोहं लोहेन, सीसं सीसेन**[८] इति। तथा च - **लवणेन सुवर्णं सन्दध्यात्, सुवर्णेन रजतं, रजतेन त्रपु, त्रपुणा सीसं, सीसेन लोहं, लोहेन दारु, दारुणा चर्म।**[९] इति।

सूर्यकान्तमणिना अग्न्युत्पत्तिः

यास्काचार्येण निरुक्तग्रन्थे एवं स्पष्टीकृतं यद्यदा सूर्यः प्राचीत उत्थाय किञ्चिदूर्ध्वं गच्छति तदा यदि वयं कंसं सूर्यकान्तमणिं वा परिमृज्य सूर्याभिमुखं कृत्वा स्थापयामश्चेत् तेन (कंसेन मणिना वा) निर्गच्छता तापेन अधोभागे स्थापितं शुष्कं गोमयं कार्पासं वा प्रज्वलितं भवति। यथा - **अथादित्यात्। उदीचीं प्रथमसमावृत्त आदित्ये कंसं मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयम्, अस्पर्शयन् धारयति तत् प्रदीप्यते**[१०] इति।

एवमेवान्येऽपि विषयाः रत्नपरीक्षा-मुक्ताभस्म-पारदभस्म-वङ्गभस्मेत्यादीनां परीक्षणविधिः निर्माणविधिश्च यत्र तत्रोल्लिखितमवाप्यते। सर्वेषामत्र समावेशो न कर्तुं शक्यते।

(ग) कार्बनिकं रसायनम् (organic chemistry) - वेदेषु सोमरसस्य सुरायाश्चानेकत्र वर्णनान्युपलभ्यन्ते। एतेषां निर्माणविधेर्वर्णनमपि यत्र तत्र वर्तते। सुरायाः कतिपयभेदानामप्युल्लेखो विद्यते। सोमस्यासवस्य च विषये सङ्क्षेपेणात्र वर्णनं प्रस्तूयते -

सोमः - ऋग्वेदस्य नवमं मण्डलं सोमविषयकमेवास्ति। तत्राष्टोत्तरशताधिकैकसहस्रमन्त्राः (११०८) सन्ति। तत्रेदमुक्तमस्ति यत्सोमः देवतानां पेयपदार्थविशेषोऽस्ति। सोमरसस्य निष्पीडनप्रक्रिया सोमसुतिः सोमसुत्या च कथ्यते। अनया प्रक्रियया निष्पीडनकर्तुः नाम सोमसुत् सोमसुत्वन् च भवति। कार्यमिदमतिपवित्रं मन्यते। यथा - **अश्नवत् सोमसुत्वा**[११] इति।

---

१ अथर्वसंहितायाम् ६/६३/२
२ अथर्वसंहितायाम् ६/६३/३
३ अथर्वसंहितायाम् ४/३७/८
४ अथर्वसंहितायाम् ४/३७/९
५ ऋग्वेदसंहितायाम् १/१६७/३
६ अथर्वसंहितायाम् १/१६/४
७ अथर्वसंहितायाम् ७/११५/१
८ गोपाथब्राह्मणे पू. १/१४; जै. उ. ब्रा. ३/१७/३
९ छान्दोग्योपनिषदि ४/१७/७
१० निरुक्ते ७/२३
११ ऋ.सं. १/११३/१८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशिरः - सोमस्य मिश्रणेन त्रिविधाः पदार्थाः निर्मीयन्ते, ते चाशिर इत्युच्यन्ते। एषां नामानि-दध्याशिरः, यवाशिरः, गवाशिरश्च सन्ति। दध्नः मिश्रणेन निर्मितस्य पेयपदार्थस्य नाम **दध्याशिरः**, सक्तूनां मिश्रणेन निर्मितः पेयपदार्थः **यवाशिरः**, दुग्धादीनां मिश्रणेन निर्मितः पेयपदार्थः **गवाशिर** इत्युच्यन्ते। एषां त्रयाणामपि सामूहिकं नाम **त्र्याशिर** इत्यस्ति। तदुक्तं वेदे - **सोमा इव त्र्याशिरः**।[१]

आसवः - यजुर्वेदे आसवस्योल्लेखोऽस्ति। आसवोऽपि देवानां पेय उक्तः। आसवस्यार्थो भवति प्रेरकः, उत्तेजकः, स्फूर्तिदायकश्च। सोमः स्फूर्तिदायकोऽस्ति तस्मात् स देवानां पेय उक्तः। तदुक्तमपि - **आसवं देववीतये**[२] इति।

मधु - सोमतुल्यमेव मधोरपि आसवः रसायनं निर्मीयते। तदुक्तमृचि - **मध्वो रसम्**।[३] ऐतरेयश्रुतावपि - **रसो वा एष ओषधिकवनस्पतिषु यन्मधु**।[४] अर्थान्मधु ओषधिवनस्पतिषु रसरूपेण तिष्ठति। तस्मात्सोमेऽपि मधोरुपस्थितिः सिद्धमेव।

रसायननिर्माणम् - अथर्ववेदस्यैकस्मिन्मन्त्रे वर्णितमस्ति यद्वृष्ट्युदके सोमादीनामासवं मिश्रयित्वा यद्रसायनं निर्मीयते तस्योपयोगेन मनुष्यो दीर्घायुं प्राप्नोति। तद्यथा - **अपो दिव्या अचायिषं रसेन समपृक्ष्महि**[५] इति।

सुरा - वेदेष्वनेकत्र सुराया अप्युल्लेखोऽस्ति। द्रव्यमिदं मादकत्वान्मांसभक्षणमिव निन्दनीयमुक्तम्। तदुक्तमथर्वे - **यथा मांसं यथा सुरा०**[६] इति। सुरानिर्माणकर्ता **सुरावत्** उच्यते। सुरास्थापनपात्रञ्च **सुराधानम्**, येन चषकेन सुरापानं क्रियते तत्पात्रं सुराकंस इत्युच्यते। सुरापानेनोत्पद्यमाणो रोगः सुरामश्चोच्यते।

सुरानिर्माणविधिः - शुक्लयजुष एकोनविंशतितमाध्यायस्यादितः पञ्चविंशतितमं यावन्मन्त्रे सुरानिर्माणस्य विभिन्नविधेर्वर्णनमस्ति। भाष्यकृता महीधरेणापि तद्विषयस्य विवेचनं कृतम्। यथा -

विरूढा व्रीहयः शष्पम्। विरूढा यवास्तोक्माः। भृष्टव्रीहयो लाजाः। सर्जत्वक्फलाशुण्ठीपुनर्नवाचतुर्जातक-पिप्पली-गजपिप्पली-वंशावकाबृहच्छत्राचित्रकेन्द्र-वारुण्यश्वगन्धा-धान्यक-यवानी-जीरकद्वय-हरिद्राद्वय-विरूढयव-व्रीहय एकीकृता नग्नहुः। शष्पतोक्मलाजनग्नहून्दक्षिणद्वारेणाग्निगृहं नीत्वा सञ्चूर्ण्य दर्शपौर्णमासधर्मेण व्रीहिश्यामाकयोश्चरू बहुजले पक्त्वा शृतालम्भनानन्तरं तयोश्चर्वोर्निःस्रावमुष्णं पृथक्पात्रयोरादाय शष्पादिचतुर्णां चूर्णैः

---

१ ऋ.सं. ५/२७/५
२ शु.य.सं. २२/१३
३ ऋ. सं. ५/४३/४
४ ऐ.ब्रा. ८/२०
५ अथर्वसंहितायाम् ७/८९/१
६ अथर्वसंहितायाम् ६/७०/१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसृज्य स्थापयेत्। द्वयं चूर्णाचामरूपं मासराख्यम्। तैः संसृज्य त्रिरात्रं यावत् शालानैर्ऋतकोणे गर्तं कृत्वा तत्र स्थापयेत्। त्रिरात्रानन्तरं सौत्रामणीयागनिमित्ता सुरा निष्पन्ना भवति।

विविधाः - एतदतिरिक्ता अन्येऽपि बहवो विषया वेदेषु वैदिकसाहित्येषु च वर्णिताः सन्ति। यथा - अष्टमहारसाः, त्रिविधाः क्षाराः, ताम्रस्य स्वर्णरूपेण परिवर्तनम्, रजतद्रव्यस्य स्वर्णरूपेण परिवर्तनम्, रजतशुद्धिः, मुक्तादीनां रत्नानां द्रवीकरणम्, धातुहननम्, अम्लराजनिर्माणम्, लौहभेदाः, अभ्रक-स्वर्ण-क्षारनिर्माणादिकं च सर्वं बहुविधरासायनिकप्रयोगसहितं वर्णितमस्ति। वैद्यकशास्त्रेऽपि विविधानां रासायनिकविधीनां वर्णनानि सन्ति। परं विस्तारभयान्नात्रोद्धियन्ते। यतः समेषामत्र लघुनिबन्धे वर्णनासमर्थत्वादत्रैव विरमामीत्यलम्।

विद्यावाचस्पतिः डॉ.सुन्दरनारायणझाः
सहायकाचार्यः, वेदविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
बी-4, कुबुतसांस्थानिकक्षेत्रम्, नवदेहली-16

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायदर्शनदिशा वेदप्रामाण्यविचारः

डॉ. विष्णुपदमहापात्रः

''सर्वं शब्देन भाषते'' इत्यस्माद् वाक्यादस्माभिर्ज्ञायते यत् सर्वविषयकव्यवहारस्य मूलकारणं शब्द एव, शब्दोच्चारणं तज्ज्ञानमन्तरा वा व्यवहारो नैव सम्भवति इत्यत्र शब्दस्य जगदाधारकत्वमस्तीति वचनेनाऽपि नास्ति काचन विप्रतिपत्तिः, किन्तु शब्दराश्यात्मकवेदस्य प्रमाण्यमस्ति न वेत्यत्र महान् मतभेदो वरीवर्ति। तत्र वेदानभ्युपगन्तॄणां चार्वाकादिनये वेदस्य पृथक् सत्ता एव नास्ति प्रामाण्यविषये का युक्तिः समुदिता, यतः **''पुत्रकामः पुत्रेष्ट्या यजेत''** इत्यस्माद्वाक्याद् बोध्यते यत् पुत्रेष्टियाग-करणेन पुत्रस्योत्पत्तिर्भवति। किन्तु स्थलविशेषे दृश्यते यद् वेदवाक्यविहितपुत्रेष्टियागसम्पादनेऽपि फलाभावाद् वेदवाक्यानामनृतत्वमिति। एवञ्च ''कारीरिना यजेत'', ''वर्षकामेष्टिः कारीरी'' वृष्टिकामविशिष्टकारीरीयागस्य सम्पादनेऽपि वृष्ट्यभावदर्शनाद् वेदोक्त''पुत्रेष्टि'', ''कारीरी''त्यादियागानां सफलत्वे इह काले च तस्य प्रत्यक्षविषयत्वात् समेषां वेदवाक्यानां दृष्टार्थत्वापत्तिः दृष्टार्थवेदवाक्यानां मिथ्यात्वात् तादृशदृष्टान्तत्वेन तदितरवेदवाक्यानामप्यनाप्तत्वमिति प्रतिभाति।

न केवलमनाप्तदोषः व्याघातदोषोऽपि दृश्यते, व्याघातदोषस्यार्थो भवति परस्परविरोधः। व्याघातदोषविषये भाष्यकारेण वात्स्यायनेन प्रतिपादितं, यत् **"विहित-व्याघातदोषाच्च हवने"**, **"उदिते होतव्यम्"**, **"अनुदिते होतव्यम्"**, **"समाध्युषिते होतव्यम्"** इति विधाय विहितं व्याहन्ति, श्यावोऽस्याहुतिमभ्यहरति य उदिते जुहोति, शवलोऽस्याहुतिमभ्यवहरति योऽनुदिते जुहोति'' श्यावशवलौ वास्याहुतिमभ्यवहरतो यः समयाध्युषिते जुहोति'' व्याघाताच्चान्यतरद् मिथ्येति।[१] अभिप्रायस्तु वेदे परस्परविरुद्धवाक्यप्रतिपादनदर्शनाद् वेदस्य प्रामाण्यविषये संशयोत्पत्तिः, यतः कदा होमः कर्तव्य इति जिज्ञासायाम् उदितानुदितसमयाध्युषितेति विहितकालत्रयस्य दृश्यमानत्वात् कालत्रय-विहितहोमस्यापि निन्दाप्रकरणेषु समुपलभ्यमानत्वाच्च पूर्वोक्तकालत्रय-विशिष्टहोमस्य निषेधत्वं संसूचितम्। कालत्रयस्य किं स्वरूपमिति जिज्ञासाया-मुच्यते स्मृतौ -

उदितेऽनुदिते चैव समयाध्युषिते तथा।
सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥[२]

सूर्यनक्षत्रवर्जितः कालः

समयाध्युषितशब्देनोच्यते। उदयात् पूर्वमरुणकिरणवान् प्रविरलतारकोऽनुदितकालः ॥[३]

---

१ न्या. भा., पृ. सं. १५२
२ मनुसंहिता, २.१५
३ कुल्लुकभट्टः 'मन्वर्थमुक्तावली' टीकायाम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्योक्तवेदवाक्ये यो हि श्यावशवलादिशब्दो दृश्यते तस्यार्थः श्वा। वायुपुराणस्य गयाकृत्यप्रकरणे प्रतिपादितं यत् -

द्वौ श्वानौ श्यावशबलौ वैवस्वतकुलोद्भवौ।
ताभ्यां बलिं प्रयच्छामि स्यातामेतावहिंसकौ ॥[१]

पुनरुक्तदोषोऽपि वेदे वर्तते यथा - **"त्रिःप्रथमामन्वाह त्रिरुत्तमाम्"**[२]; उक्तवाक्येन एकादशसामाधेन्यमध्ये प्रथम - ऋङ्मन्त्रस्य उत्तम- ऋङ्मन्त्रस्य च वारत्रयं पाठः कुर्यात् इति संसूच्यते। **"होता च सामिनीभिः"**, **"प्रवोवाजा"** इत्यादिभिः ऋग्भिः अग्निं समृद्धे अतः समिग्धनसामधनत्वात् तासामपि **"सामिधेन्ये"** इति निष्पन्नम्।[३] एकादशसामाधेनीमध्ये समेषां पृथक् पृथक् सत्ता विद्यते, प्रवोवाजेति प्रवतीसञ्ज्ञां लभते। **"आजुहोता द्युवस्यत"** इति ऋङ्मन्त्रस्य सञ्ज्ञा उत्तमेति। शतपथब्राह्मणे प्रतिपादितमस्ति यत् प्रथमस्य वारत्रयं एवञ्च उत्तमस्य वारत्रयं पाठः कर्तव्यः इति। **"स वै त्रिःप्रथमामन्वाह, त्रिरुत्तमां, त्रिवृत्प्रायणाहि यज्ञास्त्रिवृदुदयनास्तस्मात् त्रिः प्रथमामन्वाह त्रिरुत्तमाम्।"**[४] **"प्रथमोत्तमयोस्त्रिरुच्चारणं विधत्ते स वै त्रिरिति। प्रारम्भपरिसमाप्त्योस्त्रियावर्तनस्य यज्ञलिङ्गत्वाद् अत्रापि प्रथमोत्तमयोस्त्रिरावृत्ति-कार्येत्यभिप्रायः।"**[५] **त्रिः प्रथमामन्वाह त्रिरुत्तमाम्** इत्यादि[६] -

वाक्यस्य पुनः पुनरुच्चारितत्वात् पुनरुक्तदोषः इति। एतद्विषये भाष्यकारेण भणितं यत् पुनरुक्तदोषाच्च - **"अभ्यासे देश्यमाने"** **"त्रिःप्रथमामन्वाह त्रिरुत्तमाम्"** इति पुनरुक्तदोषः पुनरुक्तश्च प्रमत्तवाक्यमिति। तस्मादप्रमाणं शब्दः- **"अनृतव्याघातपुनरुक्त-दोषेभ्य"**[७] इति, **"तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः।"**[८] **"त्रिःप्रथमामन्वाह त्रिरुत्तमामित्यभ्यासचोदनायां प्रथमोत्तमयोः सामिधेन्योस्त्रिवचनात् पौनरुक्त्यम् । सकृदनुवचनेन तत्प्रयोजनसम्पत्तेरनर्थकं त्रिर्वचनम्।"**[९] **"त्रिःप्रथमामन्वाह त्रिरुत्तमामन्वाह इत्यनेन प्रथमोत्तमसामिधेन्योस्त्रिरुच्चारणा-भिधानात् पौनरुक्त्यमेव।"**[१०] **"दृष्टान्तत्वेनैतानि वाक्यानुपन्यस्य एककर्तृकत्वेन शेषवाक्यानाम-प्रमाणत्वमिति।"**[११] **"दृष्टान्तत्वेन अयमत्र प्रयोगः पुत्रकामेष्टिहवनाभ्यासवाक्यानि अनृतत्वादिभ्यः,**

---

१ वायुपुराणे, १३८/३१
२ शत. ब्रा., १/३/५
३ सायणभाष्यम्।
४ शतपथ-प्रथमकाण्डे, तृतीयाध्यायः/पञ्चमब्राह्मणः।
५ सायणभाष्यम्।
६ तै.सं. २ काण्डं/५ प्रपाठकः
७ न्या. भा., पृ. सं. १५३
८ न्या. सू., २/१/५७
९ न्यायमञ्जर्याम्।
१० वैशे. सू. उप.।
११ न्यायवार्त्तिके।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं शेषाणि वाक्यानि अप्रमाणं वेदवाक्यवत् पुत्रकामेष्टिवाक्यवदिति।"[1] उपर्युक्तकारणदर्शनाद् अर्थाद् अनृतत्वपुनरुक्तव्याघातादिदोषवशाच्च वेदवाक्यानामप्रमात्वमिति नास्तिकाः प्रवदन्ति।

सिद्धान्तपक्षमुपस्थापयन्ति नैयायिकाः -

तथाहि पुत्रकामेष्ट्यादिवाक्यानां यदप्रामाण्यं नास्तिकैः संसाधितं तन्न युक्तिपथमावहति, यतः पुत्रकामेष्ट्यादिकृतायामपि यत्र पुत्रजन्माद्यभावो दृश्यते स च कर्मकर्तृसाधनानां वैगुण्यात्मक-दोषादेव भवतीति न तद्बोधकवेदवाक्यानामप्रामाण्यम्। उक्तञ्च सूत्रकारेण -

न कर्मकर्त्तृसाधनवैगुण्यात्।[2]

अर्थाद् यत्र विध्यनुसारेण तत्तद्यागादीनामननुष्ठितत्त्वं तत्र यागफलजनकादृष्टस्यानुत्पत्तिः। पुत्रेष्ट्यादियागेऽवश्यकर्तव्याङ्गयागादिविषयकानुष्ठानाभावात्कर्मवैगुण्यस्योत्पत्तिर्भवति। यत्र कर्म-वैगुण्यदोषाभिषक्ताः अनधिकारिणो भवन्ति तत्र कर्तृवैगुण्यस्योत्पत्तिः, यत्र च द्रव्यमन्त्रादि-विषयकदोषाः जायन्ते तत्र साधनवैगुण्यदोषाणामुत्पत्तिर्भवति। अतो वैगुण्यदोषनिबद्धाः सन् फलस्यानुत्पत्तिरिति चेद्वेदस्य कथमप्रामाण्यम् ? किन्तु भिन्नभिन्नस्थलेषु दृश्यते यद् वेदविहित-कर्मानुसारेण पुत्राद्यात्मकफलस्योत्पत्तिर्भवति इत्यतः वेदस्याप्रमात्वसाधयितुं वयमसमर्थाः भवेम। कर्मकर्तृसाधनवैगुण्यविषये तात्पर्यटीकाकारेण श्रीमता वाचस्पतिमिश्रेण समुपस्थापितं यत् -

"कर्तृवैगुण्यम्"- अविद्वान् प्रयोक्तेति। विदुषोऽधिकारः सामर्थ्यात् । अत एव स्त्रीशूद्र-तिरश्चामर्थामनधिकारः। विद्वानपि यदि द्विजातिकर्महानिहेतुं कर्म ब्रह्महत्यादि कृतवान्, तत्कृतमपि कर्म फलाय न कल्प्यते कर्तृत्वे वैगुण्यादिति कपूयेति, कपूयं निन्दति कर्म आचरतीत्याचरणः पुरुषः।

"कर्मवैगुण्यम्" मिथ्यासम्प्रयोगः पुरुषायितादिः मातरि योनिव्यापदो नानाविधाः पुत्रजननप्रतिबन्धहेतवः लोहितरेतसा बीजस्योपघातो उपहतत्वं यतः न पुत्रजन्म भवति।

"साधनवैगुण्यम्" हविरसंस्कृतमपूतमप्रोक्षितं वा, उपहतं श्वामार्जारादिभिः, मन्त्रा न्यूनाः क्रमविशेषेण। दक्षिणा दूरागता दौत्यद्यूतोत्कोचादेर्दुष्टादुपायादागतेत्यर्थः।

एतद्विषये भाष्यकारेण भणितं यत् - "नानृतदोषः पुत्रकामेष्टौ, कस्मात् ? कर्मकर्तृसाधन-वैगुण्यात्, इष्ट्या पितरौ संयुज्यमानौ पुत्रं जनयत इति, इष्टिः करणम्-साधनम्। पितरौ कर्तारौ, संयोगः कर्म, त्रयाणां गुणयोगात् पुत्रजन्म, वैगुण्याद् विपर्ययः, इष्ट्याश्रयं तावत् कर्मवैगुण्यं समीहाभ्रेषः, कर्तृवैगुण्यमविद्वान् प्रयोक्ताकपूयाचरणश्च साधनवैगुण्यं हविरसंस्कृतम् उपहतमिति।"[3]

---

१ न्या. वा. तात्पर्यटीकायाम्।

२ न्या. सू. २/१/५८

३ न्या. भा., पृ. सं. १५३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थलविशेषे पुत्रेष्टियागादीनां फलाभावत्वेऽपि तेषां यागानां निष्फलत्वमिति वक्तुं नैव शक्यते यतः पितरौनिष्ठपुत्रजन्मप्रतिबन्धकस्य रोगस्यापि विद्यमानत्वाद् यदि पुत्रात्मकफलस्य नैवोत्पत्तिश्चेत्तर्हि यागादीनां निष्फलत्वं सार्वत्रिकमिति अयुक्तिकरं प्रतिभाति। प्रतिबन्धकाभावस्य कारणकोटौ प्रविष्टत्वाद् यदि रोगस्य अभावः विद्यते चेत्तर्हि पुत्रजन्म भवत्येव। एवञ्च यज्ञकर्ता यदि पापयुक्तः स्यात् तद्वारा क्रियमाणयागकर्मणा फलस्याप्तिः भवितुं नार्हति, अर्थात् तादृशविशिष्टयागसम्पादनाय तत्तद्दोषरहितयज्ञकर्तुः तत्तद्विशिष्टयागं प्रति कारणत्वं कल्प्यते । योगोपयुक्तोपकरणादेः यदि पूर्णत्वं न स्यात्तर्हि यागसम्पादनेन न पुत्रस्यावाप्तिरित्यतः निःसङ्कोचतया वक्तुं शक्यते यद् यागाव्यवहितप्राक्क्षणावच्छेदेन तत्तदुपयुक्तकारणसमुदायस्य यदि विद्यमानता स्यात्तर्हि पुत्रेष्टियागकरणेन पुत्रस्योत्पत्तिर्भवत्येव। यथा चिकित्साशास्त्रे प्रतिपादितमस्ति यद् रोगप्रशमनाय तत्तच्छास्त्रप्रतिपादितानुसारेणोपकरणादिकं नैव सेव्यते चेत्तर्हि रोगस्य प्रशमनं कदापि न भवति इत्यतः शास्त्रस्य मिथ्यात्वमिति न सङ्गच्छते ।

तत्रेदमवधातव्यं यत् पूर्वपक्षसूत्रे वेदवाक्यानामप्रमात्वसंसाधनार्थं महर्षिणाऽनृतदोषमुद्भाव्य तत्खण्डनाय **"कर्मकर्तृसाधनवैगुण्यात्"** इति प्रतिपादितम् । कर्ताकर्मकरणवैगुण्यप्रयुक्तपुत्रेष्टि-यागविशिष्टवैदिककर्मणां फलस्यानुत्पत्तिरित्यतः फलाभाववशात् पुत्रेष्ट्यादियागविधायकवेद-वाक्यानां मिथ्यात्वं नैव सम्भवति, यतः फलाभावः यदि केनापि इतरकारणप्रयुक्तो भवति चेत्तर्हि न वेदवाक्यानां मिथ्यात्वम् । लौकिकविधिवाक्यमस्ति यत् **"अग्निकामो दारुणी मथ्नीयात्"** एतादृशविधिवाक्यानुसारेण काष्ठद्वयस्य मन्थनेऽपि यदि समुपयुक्तमन्थनाभावः उत वा समुपयुक्तकाष्ठद्वयाभावो दृश्यते चेत्तर्हि तत्र न अग्न्यात्मकफलस्योत्पत्तिः न वा ततः विधिवाक्या-नामप्रमात्वम् । प्रकृतेऽपि न्यायमञ्जरीकाराः प्रवदन्ति यद् विध्यनुसारेण कारीरियागस्य सम्पादनानन्तरं वृष्ट्यात्मकफलस्य आकाशाद् यथा पतनं सम्भवति तथैकैहिकपुत्रादिफलानां नैव पतनत्वम्, यतः पुत्रप्राप्तिं प्रति स्त्रीपुरुषसंयोगात्मककारणान्तस्य सापेक्षितत्वात् 'चित्रा', 'साङ्ग्रहणी' इत्यादियागसम्पादनानन्तरं पशुग्रामादिफलानां दृष्टत्वं सम्भवति, दृष्टान्तरूपेणोप-स्थापनाय जयन्तभट्टेन संसूचितं यत् मत्पिता साङ्ग्रहणीयागस्यानुष्ठानानन्तरं गौरमूलक-नामकग्रामः प्राप्तवानिति। यदि पुत्रेष्ट्यादियोगसम्पादनानन्तरं फलस्यानुत्पत्तिरिति चेत्तर्हि तत्र कर्मकर्तृकरणवैगुण्यात्मकदोषस्य प्रतिबन्धकत्वं कल्प्यते।

होमविधायकवेदवाक्ये पूर्वोक्तव्याघातदोषोऽपि नास्ति यतः **"अभ्युपेत्य कालभेदे दोषवचनात्"**[१] अर्थात् अग्न्याधानकाले उदितादिकालविशेषमभ्युपेत्य तद्भिन्नकाले यदि होमः क्रियते चेत्तत्र व्याघातदोषो नान्यत्र। एतत्सर्वमभिलक्ष्य भाष्यकारेण समुल्लसितं यत् "न व्याघातो हवने इत्यनुवर्तते। योऽभ्युपगतं हवनकालं भिनत्ति ततोऽन्यत्र जुहोति, तत्रायमभ्युपगतकालेभेदे दोष उच्यते, **"श्यावोऽस्याहुतिमभ्यवहरति य उदिते जुहोति। तदिदं विधिभ्रेषे निन्दावचनमिति।"**[२]

---

१ न्या. सू. २/१/५९

२ न्या. भा., पृ. सं. १५४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यासविधायकवेदवाक्ये पुनरुक्तदोषोऽपि नास्ति यतः "अनुवादोपपत्तेश्च"[१] पुनरुक्तस्तु अनर्थकोऽभ्यासः, अर्थवानभ्यासोऽनुवादो भवति। यदि प्रयोजनवशात् पुनरुक्तः क्रियते चेत् तत्र न पुनरुक्तदोषः, प्रतिपादितमस्ति यत् शतपथब्राह्मणे - "त्रिः प्रथमामन्वाह त्रिरुत्तमा" मित्यनुवादोपपद्यतेऽर्थवत्त्वात् त्रिर्वचनेन हि प्रथमोत्तमयोः पञ्चदशसामिधेन्यां भवति। तथा च मन्त्राभिवादः - "इदमहं भ्रातृव्यं पञ्चदशवारेण वाग्वज्रेणापवाधे योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः" इति पञ्चदशसामिधेनीर्वज्रमन्त्रोऽभिवदति, तदभ्यासमन्तरेण न स्यादिति। तत्रेदमवगन्तव्यं यद् "अहं भ्रातृव्यम्" इत्यत्र **"व्यन् सपत्ये"**[२] इति पाणिनिसूत्रानुसारेण भ्रातृशब्दोत्तरं व्यन् प्रत्ययकृते सति भ्रातृव्यशब्दस्य निष्पत्तिः, भ्रातुरपत्यस्य यत्र रिपुरूपार्थकत्वं तत्रैव भ्रातृशब्दोत्तरं व्यन्प्रत्ययः सम्भवति। "भ्रातृर्व्यन्स्यादपत्ये प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये वाच्ये भ्रातृव्यः शत्रुः।"[३] तत्त्वबोधिन्याञ्च भ्रातुरपत्यं यदि शत्रुस्तदा भ्रातृशब्दाद् व्यन्नेव स्यात्।" शतपथब्राह्मण-ग्रन्थस्य भाष्ये सायणाचार्येण प्रतिपादितं यत् - "व्यन् सपत्ने" इति स्मृतौ भ्रातृव्यः शत्रुः। वेदे च दर्शपूर्णमासयागे पञ्चदशसामिधेनिविषयकपाठानां समुल्लसितं वर्तते। "ताः पञ्चदशसामिधेन्यः सम्पद्यन्ते, पञ्चदशो वै वज्रो वीर्यं वीर्यामेवैतत् सामिधेनीरभिसम्पादयति तस्मादेतास्वनुच्यमानासु यं द्विषात् तमङ्गुष्ठाभ्यामववाधेतेदमहममुमववाथ इति तदेनमेतेन वज्रेणाववाधते।"[४]

पञ्चदशसामिधेन्यो दर्शपूर्णमासयोः। सप्तदशेष्टि पशुबन्धानाम्।[५]

अभ्यासेन तु सङ्ख्यापूरणं सामधेनीस्वभ्यासप्रकृतित्वात्।[६]

"प्रकृतौ अभ्यासेन सङ्ख्या पूरिता। त्रिः प्रथमामन्वाह त्रिरुत्तमामिति। कथम् ? पञ्चदश सामिधेन्य इति श्रुतिः। एकादश च समाम्नाताः। तत्राभ्यासेनागमेन वा सङ्ख्यायां पूरयितव्यायामभ्यास उक्तः, त्रिः प्रथमामन्वाह त्रिरुत्तमामिति । अनेन नियमेन प्रथमोत्तम-योरभ्यासः पूरयितव्यायामभ्यासः कर्तव्य इति। यावत् कृत्वस्तयोरभ्यासे क्रियमाणे पञ्चदशसङ्ख्या पूर्येत तावत्कृत्वोऽभ्यसितव्यमित्येतदभिप्रायं त्रित्वमिति।"[७] उपर्युक्तकारणात् ज्ञायते यत् "पञ्चदश सामधेनीरन्वाह" इति श्रूयमाणं पञ्चदशत्वं सामधेनीनां एकादशसङ्ख्याकर्चामभ्या-समन्तरा नोपपद्यते स एवाभ्यासः **"त्रिःप्रथमाम्"** इति वाक्येनोक्त इति सामधेनीनामृचां पञ्चदशत्वसम्पादकत्वान्न निरर्थकस्तथा च न पुनरुक्तदोषः, अनुवादवाक्यानां कथं सार्थक्यमिति जिज्ञासायामुच्यते यद् वाक्यविशेषानुवादस्य सप्रयोजनत्वात् सार्थक्यं तेन च प्रामाण्यम्। एवञ्च विध्यनुवादादीनां वाक्यविभागानां सार्थकत्वात् शब्दराश्यात्मकं सर्वं वेदवाक्यं प्रमाणम् ।

---

१ न्या. सू. २/१/१६०
२ पा. अ. सू. ४/१/१४५
३ सिद्धान्तकौमुद्याम्।
४ शत. १, का.२, अ.५, ब्रा.१
५ आपस्तम्बधर्मसूत्रम्।
६ पू.मी., अ. १०, ५ पाद, सू.सं. २७
७ शबरभाष्ये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुमानेनापि वेदवाक्यानां प्रामाण्यं सिद्ध्यति, प्रतिपादितञ्च न्यायवार्तिककारेण "समस्तानि वेदवाक्यानि पक्षीकृत्याभिधीयते प्रमाणं वेदवाक्यानि अर्थविभागवत्त्वाद् मन्वादिवाक्यवत्" इत्याकारकानुमानेन वेदवाक्यानां प्रमाणत्वं संसाधितत्वाद् वेदवाक्यानां प्रामाण्यं नास्तीति कथनमसङ्गतमित्यलमति विस्तरेण।

डॉ. विष्णुपदमहापात्रः
सहायकाचार्यः
न्यायवैशेषिकविभागः
श्रीला.व.शा.रा.सं. विद्यापीठम्,
नवदेहली - 110016

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 20 वेदविद्या
जुलाई-दिसम्बर 2012 ISSN – 2230-8962

सामवेदीयच्छन्दोविमर्शः

डॉ. सदानन्दत्रिपाठी

विराट्पुरुषपरमात्मनः श्वासोच्छ्वासभूतो वेदः। विश्ववारा भारतीयसनातनधर्मसंस्कृति-सभ्यतादीनाञ्च मूलाधारो वेदः। पूर्वस्मिन् काले वेद एक एवासीदृगवेदाख्यः किन्तु वर्त्तमाने मन्वन्तरे द्वापरयुगे कृष्णद्वैपायनेन भगवता व्यासदेवेन यज्ञानुष्ठानाधिकारिभेदात्तस्य चत्वारो विभेदाः - ऋग्वेदो, यजुर्वेदः, सामवेदोऽथर्ववेदश्चाभिधेयेन व्यस्ताः। यज्ञप्रक्रियायामृग्वेदो होत्रे, यजुर्वेदोऽध्र्यवे, सामवेदः उद्गात्रेऽथर्ववेदश्च ब्रह्मणेऽधिकारित्वेन पृथक् पृथक्तया निर्धारितः। एवं प्रकारेणापौरुषेय एक एव वेदश्चतुर्धा विभक्तः। विराट्पुरुषपरमात्मना ह्यलोकसामान्येन विरचितत्वादपौरुषेयाः वेदाः। इत्थमेव, हिरण्यगर्भपुरुषेणानादिना विभुना सर्वव्यापिविष्णुना विरचितत्वात् पौरुषेया अपि वेदाः कथ्यन्ते। तर्कन्यायमीमांसादिशास्त्रसम्मतं सर्वथा वेदानां पौरुषेयापौरुषेयत्वम्। वेदानां स्वतः प्रामाण्यं परतः प्रामाण्यं च सुप्रथितमस्ति। **'निरपेक्षो रवःश्रुतिः'**[१] इतिशास्त्रवचनमत्र परमं प्रामाण्यम्।

गद्यपद्यगीतीनाञ्च स्वरूपगतभेदात् प्रसिद्धायां वेदत्रय्यां वेदचतुष्टय्यां वा गीतिभागः सामवेद इति नाम्नाऽभिधीयते। चतसृष्वपि वैदिकसंहितासु सामवेदसंहिता परमगौरवशालिनीरूपेण समाद्रियते वेदविद्भिः। एतन्महत्त्वमुद्गिरन्नाह स्वयं भगवान् श्रीकृष्णचन्द्रः श्रीमद्भगवद्गीतायाम् - **'वेदानां सामवेदोऽस्मि०'**[२]। महर्षिशौनकस्य वचनप्रमाणानुसारं यः पुरुषः सामानि समुचितरीत्या जानाति, स एव वेदस्य यथार्थं तत्त्वं वेत्तीति, तन्महिमानं डिण्डिमघोषपूर्वकं प्रकटयन्नाह- **'सामानि यो वेद स वेद तत्त्वम्'**[३]। सामवेदस्य समुत्पत्तिः भुवनभास्करादजायत इत्येवं विज्ञापयति भगवान् मनुः -

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम् ॥[४]

किन्नाम साम ? इति जिज्ञासायाः समाधानाय किञ्चिद्विमृशामः। यो वेदो गानमात्रेण सर्वं दुःखं नाशयति, तस्य नाम सामवेदः। 'साम' शब्दस्य परिभाषा क्रियते कोशकारैः, - 'स्यति छिनत्ति दुःखं गेयत्वात्; स्यति दुःखयति दुरध्येयत्वादिति वा। अर्थात्, यस्य वेदस्याध्ययने गाने च परिश्रमेण दुःखमनुभूयते, तन्नाम सामवेदः। नपुंसकत्वे साम शब्दस्य निष्पत्तिः **'सो + सातिभ्यां मनिन्मनिणौ'**[५] इति सूत्रेण मनिन् प्रत्ययत्वात् साम(न्) शब्दो वेदविशेषार्थकः संसिद्ध्यति।[६] वेदनाम्नैव संस्मरति श्रीमदमरसिंहः -

---

१ मीमांसान्यायप्रकाशः; पूर्वभागः, श्रुतिनिरूपणम् पृ. ८८
२ श्रीमद्भगवद्गीता शाङ्करभाष्यम्, अध्यायः १०/२२
३ बृहद्देवता, अध्यायः ८/१३०
४ मनुस्मृतिः, अध्यायः १/२३
५ उणादिसूत्रम्, ४/१५२
६ शब्दकल्पद्रुमः, पञ्चमःकाण्डः, पृ. ३३२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः।
स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी॥[१]

'स्यति पापं साम' षोऽन्त्यनाशे त्रासुसिति मन् इति भरतः; अर्थाद् यत्पापं स्यति, नाशयति, तस्य नाम साम(न्)। तल्लक्षणमाह जैमिनिः - **'गीतिषु सामाख्या'**[२] इति। सामशब्दस्यैका समीचीना निरुक्तिर्बृहदारण्यकोपनिषदि समुपलभ्यते -

'सा च अमश्चेति तत्साम्नः सामत्वम्।'[३] साम्नो यथार्थं रससारं केवलं जागरणशीलः समाहितचित्तो विद्वान्पुरुष एव प्राप्तुं शक्नोति। निद्रामग्नोऽलसः कथमपि लब्धुं नार्हति, सचेष्टं करोति ऋग्वेदवाणी बहुशः। निदर्शनार्थमुद्धियते -

'यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति'।[४]

वेदान्तदर्शनप्रस्थाने पराऽपरेति द्वे विधे स्तः। तत्र सामवेद अपराविद्यारूपेण वर्णितो वर्त्तते वेदैरन्यैः सहैव। वेदाङ्गाश्चापि ह्यनुस्यूताः विद्यायामस्याम्।

'तत्रापरा, ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते'॥[५]

सर्वभूतान्तरात्मनः अक्षरपुरुषात्सम्प्रसूताः सन्ति ऋचः साम, यजूंषि, दीक्षा, सम्पूर्णयज्ञाः, क्रतवो, दक्षिणा, संवत्सरो, यजमानः, सूर्यचन्द्राभ्यां प्रकाशिता लोकादयश्चेति।

तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च।
संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः॥[६]

अथर्ववेदीयाया मुण्डकोपनिषदो मन्त्रस्यास्य भाष्यं सार्द्धद्विसहस्रोत्तरैकविंश २५२१ ख्रिस्ताब्दवर्षपूर्वं लब्धजन्मा प्रस्थानत्रयीभाष्यकारः कलौ साक्षाच्छिवावतारः श्रीमज्जगद्गुरुरादि-शङ्कराचार्य्यभगवत्पादः प्रणिनाय।[७] अपौरुषेयवैदिकपरम्परासंरक्षार्थं भारतवर्षस्य चतुर्दिक्षु स्वसंस्थापितेषु मठेषु चतुर्णामृग्यजुःसामाथर्ववेदानामधिष्ठातृत्वं निर्धारितवान्। पश्चिमसागर-तटवर्त्तिनि द्वारकाशारदामठे प्रधानरूपेण गीतिसङ्गीतिप्रधानः सामवेदस्तत्र प्रकल्पितः। प्रमाणमत्र भगवत्पादप्रणीतो ग्रन्थो **'मठाम्नायसेतु'**रिति[८]। सत्यसनातनवैदिकधर्मसंरक्षणैकव्रती भगत्वपादादिशङ्कराचार्य्यश्त्रिवेदानां लक्षणं प्रकुर्वन्नाह स्वीये भाष्ये।

---

१ अमरकोशः, प्रथमःकाण्डः, ६/३
२ पूर्वमीमांसासूत्रम, २/१/३६
३ बृहदारण्यकोपनिषद्, १/३/२२
४ ऋग्वेदसंहिता ५/४४/१४
५ मुण्डकोपनिषद्, १/१/५
६ मुण्डकोपनिषद्, २/१/६
७ शङ्करावतरणम् - स्वामिश्रीज्ञानानन्दसरस्वती, वाराणसी (उ.प्र.) विक्रमाब्दः २०६१, द्वितीयपुष्पम, प्रकाशकः - श्रीमदाद्यजगद्गुरुशङ्कराचार्य वैदिकशोधसंस्थानम, लहुराबीर, वाराणसी
८ माधवाचार्य्यविरचितः श्रीशङ्करदिग्विजयः, परिशिष्टः (घ), पृष्ठं ६०२; प्रकाशकः श्रीश्रवणनाथज्ञानमन्दिरम, हरिद्वारम, विक्रम सं. २०४२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'तस्मात्पुरुषादृचो नियताक्षरपादावसाना गायत्र्यादिच्छन्दोविशिष्टा मन्त्राः। साम पाञ्चभक्तिकञ्च साप्तभक्तिकञ्च स्तोभादिगीतविशिष्टम्। यजूंषि अनियताक्षरपादावसानानि वाक्यरूपाण्येवं त्रिविधा मन्त्राः।'[१]


डॉ. शान्ति पोखरेल

भारतीयप्रज्ञायाः अपूर्वा सृष्टिः वेदो मानवजातेर्ज्ञानस्रोतोऽस्ति । वेदोऽयं संहिता ब्राह्मणम् आरण्यकम् उपनिषदिति पर्यायचतुष्टये विभाजितः । तत्र उपनिषद् परा विद्येति कथ्यते ।[1] वेदात् परा वेदस्यान्तिमपर्याया वा उपनिषद् । वेदो ज्ञानशब्देनोच्यते चेदुपनिषद् ज्ञानस्य पराकाष्ठा विद्यते । मानवजीवनस्य पुरुषार्थचतुष्टयेषु मोक्षाख्यान्तिमपुरुषार्थप्राप्त्यर्थमुपनिषदेव सेवनीया । प्रतिवेदसम्बद्धाः अनेका उपनिषदः सन्ति । तत्र सामवेदीयोपनिषदोः मुख्यतमा प्राचीना च छान्दोग्योपनिषद् । अपरा केनोपनिषदिति ख्याता । वस्तुतः प्राचीनोपनिषत्सु मुख्ये द्वे एव - बृहदारण्यकोपनिषद् छान्दोग्योपनिषच्च । गद्यमयी अष्टाध्यायात्मिका तत्त्वमसीति महावाक्यस्य जननीस्वरूपा आख्यानोपाख्यानैः समलङ्कृता इयं छान्दोग्योपनिषद् मानवमननस्य परमगौरवमयस्य कौतुहलोद्दीपकस्य च युगस्य सङ्क्षिप्तेतिहासः इति ऋषिणारविन्देन प्रोक्तम्।[2] अस्याः उपनिषदः उपदेशपद्धतिः शिक्षादानपद्धतिश्च व्यावहारिकीति मन्यते । छान्दोग्योपनिषदश्चिन्तकानां चिन्तनशैल्यपि मनोहारिणी वर्त्तते।

छान्दोग्योपनिषदि चर्चितेषु चिन्तकेषु शिलकः शालावत्यः, चैकितायनो दाल्भ्यः, प्रवाहणो जैवलिः, अतिधन्वा शौनकः, उषस्तिः चाक्रायणः, शाण्डिल्यः, सयुग्वानो रैक्वः, हारिद्रुमतो गौतमः, सत्यकामो जाबालः, प्राचीनशाल औपमन्यवः, सत्ययज्ञः पौलुषिः, इन्द्रद्युम्नो भाल्लवेयः, जनः शार्कराक्ष्यः, बुडिल आश्वतराश्विः, राजा अश्वपतिः, उद्दालक आरुणिः, श्वेतकेतु आरुणेयः, सनत्कुमारः ,नारदः, प्रजापतिः, इन्द्रः विरोचनश्च प्रमुखाः । एतेषां चिन्तनम् उपदेशप्रदानपद्धतिश्च समासेन प्रस्तूयते इह।

---

[1] मुण्डकोपनिषद् १.१.४

[2] उपनिषद्-सङ्ग्रह (ग्रन्थिक प्रकाशन), पृ. ६८ तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छान्दोग्योपनिषद् उद्गीथोपासनया प्रारब्धा । इह ओमिति उद्गीथमित्युच्यते – **ओमित्येतदक्षरमुद्गीथमुपासीत...**।[3] अत्र उद्गीथशब्द ओमित्यस्य विशेषणम् ।[4] उच्चस्वरेण कृतं सामगानम् उद्गीथपदेनोच्यते । उत् गी थ इत्येतेषु उत् उत्थानवाचकः गी वाणीवाचकः थ स्थितिबोधकः । तत्रोच्यते पृथिव्याः सर्वेषां रसानां **रसतमः** उद्गीथ इति।[5] यतः 'एषां भूतानां पृथिवी रसः पृथिव्या आपो रसः। अपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः' इति ।[6] अनेन मन्त्रोदाहरणेन छान्दोग्योपनिषद ऋषीणां चिन्तनं चिन्तनशैली तदुपस्थापनपद्धतिश्च विज्ञानसम्मता इव प्रतिभाति । उक्तव्याख्यानशैल्याम् आरोहसिद्धान्त अनुसृत इत्युच्यते ।[7] इह स्थूलतः सूक्ष्मं प्रति क्रमारोहणं परिलक्ष्यते । इदृगन्वेषणविधिमभिलक्ष्य इयमुपनिषद् 'उत्कृष्ट Inductive Spiritual Science' इति रूपेण ख्याता ।[8] उक्तमन्त्रस्य शाङ्करभाष्ये स्पष्टीकृतं यत् चराचराणां भूतानां पृथिवी आश्रयः, आप पृथिव्याः रसः यतः पृथिवी अप्सु ओता च प्रोता च । अप्परिणामत्वात् पुरुष ओषधीनां रसः । पुरुषस्य वाग्रसः यतः पुरुषावयवानां वाक् सारिष्ठा । तस्याः वाचः सारतरा ऋग्रसः । ऋचः सारतरं साम रसः । तस्यापि साम्नः सारतर उद्गीथ ओङ्कारो वा इति ।

अस्या उद्गीथविद्यायाः विशारदाः शिलकः शालावत्यः चैकितायनो दाल्भ्यः प्रवाहणो जैवलिश्चासन् । तेषां चिन्तनेऽपि एका अन्वेषणशैली परिस्फुटिता—'का साम्नो गतिरिति स्वर इति होवाच । स्वरस्य का गतिरिति प्राण इति होवाच । प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गतिरित्याप इति होवाच । अपां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति.....अयं लोक इति होवाचास्य लोकस्य का गतिरिति.....आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव

---

[3] छान्दोग्योपनिषद् १.१.१
[4] छा. उ. १.१.१ इत्यस्य आनन्दगिरिभाष्ये
[5] छा. उ. १.१.३
[6] छा. उ. १.१.२
[7] कल्याण-उपनिषदङ्कः, पृ. ४२
[8] कल्याण-उपनिषदङ्कः, पृ. ४२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम्' इति।[9] अतिधन्वा शौनकोऽपि उद्गीथविदासीत्, तेन उदरशाण्डिल्याय शिष्याय एषा विद्योपदिष्टा।[10] उद्गीथोपासनायाः ज्ञाता अपरचिन्तकः आसीत् उषस्तिः चाक्रायणः । तेन राजयज्ञे वृताः प्रस्तोता उद्गाता प्रतिहर्ता च तत्तद्विषये उपदिष्टाः ।[11]

ऋषिः शाण्डिल्य आसीत् शाण्डिल्यविद्यायाः प्रवक्ताः । अस्याः विद्यायाः सारस्तु 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति ।[12] अर्थात् जगदिदं तत्-तस्मात् ब्रह्मणो जातम् (तज्जम्) तस्मिन् ब्रह्मणि एव लीयते (तल्लम्) तस्मिन्नेव स्थितिकाले अनिति चेष्टते वा । अतः 'तज्जलानिति' । शाण्डिल्यविद्यावर्णनाया एषा पद्धतिः The Enigmatic Method (प्रहेलिकापद्धतिः) इति रूपेण स्वीकृता ।[13]

उपदेष्टारः कीदृशाः भवेयुरिति जिज्ञासायां छान्दोग्योपनिषदि निगदितं— 'आचार्य्यवान् पुरुषो वेद' इति ।[14] यो ह्याचार्यवान् आचारशीलो वा तेनैव सदाख्यं ब्रह्म ज्ञायते इति भावः । अतो ह्याचार्यः गुरुरुपदेशको वा तेन आचारशीलेन ज्ञानिना च भवितव्यम् । यतः 'आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापयति' इति ऋषिवचनम्।[15]

उक्तं हि यस्मिन् अग्निरस्ति तेनैवाग्निस्तेजोऽन्यस्मै निवेशयितुं शक्यते – 'only those who have the flame in them can stir the fire in others.'[16]

उपदेशप्रदानात्पूर्वं शिष्यस्य जिज्ञासोर्वाधिकारित्वं परीक्ष्यन्ते स्म । छान्दोग्योपनिषद अन्यतमचिन्तकेन सयुग्वानेन रैक्वेण पौत्रायणस्य जानश्रुतेः धैर्य्यं परीक्ष्य तस्मै संवर्गविद्योपदिष्टा ।[17] जानश्रुतिना संवर्गविद्याप्राप्त्यर्थं रैक्वाय गोसहस्रसमेत-

---

[9] छा. उ. १.८.४-८, १.९.१

[10] छा. उ. १.९.३, ४

[11] छा. उ. १.११.१-९

[12] छा. उ. ३.१४. १

[13] A constructive survey of Upanishadic Philosophy (by R.D. Ranadey) P. 23

[14] छा. उ. ६.१४.२

[15] छा. उ. ४.९.३

[16] The Principal Upanishads by S. Radhakrishnan, P-102

[17] छा. उ. ४.१-३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्काश्वतरीरथान् स्वकन्यां रैक्वोषितग्रामञ्च प्रदाने सत्यपि रैक्वेण राजा जानश्रुतिः शूद्रत्वेन सम्बोधितः । तथापि राजा रुष्टो नाभवत् । इत्थं धैर्य्यादिलक्षणं दृष्ट्वा रैक्वेण तस्मै संवर्गविद्या प्रदत्ता । दार्शनिकेन सर्वपल्लीराधाकृष्णनेन 'The great thinker of the Upanishad' इति रूपेण स्वीकृतो रैक्वः ।[18]

ज्ञानार्थिछात्रस्य शिष्यस्य वा अर्हतायाः परीक्षणविधिरपि विचित्रा आसीत् । जातिपरिचयहीनमपि योग्यताधिया गुरुः शिष्यत्वेनाङ्गीकृत्य ब्रह्मविद्यां यच्छति स्म । पितृपरिचयहीनः सत्यशीलो जाबालः सत्यधर्मत्वात् गुरुणा हारिद्रुमत-गौतमेन शिष्यत्वेन स्वीकृतः ।[19] सत्यकाममुपनीय गुरुः गौतमः गोयूथात् कृशाः चतुःशतगाः अपकृष्य गोचारणाय तं नियोजयति । सत्यकामश्च गवां सहस्रसङ्ख्यां यावन्न पूर्यते तावन्न प्रत्यागच्छेयमित्युक्त्वा गोभिः वनं जगाम । प्रकृत्या उदारनिकेतने अरण्यवीथिकायां निर्जने निभृते नानारसरूपगन्धगतिगीतिप्रशान्तिप्रीतिमय्याः प्रकृत्याः मातृक्रोडे सत्यकामेन विद्याधिगता । प्रकृतिः सत्यकामस्य आचार्या धात्री च । महाशून्ये भास्वन्तं नभसि दीप्तिमन्तं जीवधात्रीधरित्र्याः मूकहृदयादुत्थितं सत्यस्वरूपं ब्रह्मज्ञानमादौ प्रकृति-सकाशात् सत्यकामः अवाप्नुयात् ।[20] अनन्तरं गुरुगौतमेन स उपदिष्टः ।

तदानीं विद्यार्थिनः गुरुगृहे एकत्रावस्थाय गुरुसकाशात् उपदेशं गृह्णन्ति स्म । परन्तु तेषां शिक्षासमाप्तेः कालो निर्दिष्टो नासीत् । गुरुणा शिष्यस्य ज्ञानगाम्भीर्यं निरूप्य समावर्तनदिनं निर्धार्यते स्म । सत्यकामस्य शिष्य उपकोसल एकाकी बहुदिनं यावद् अग्निं परिचचार ।[21] तस्य सहाध्यायिनः समावर्तनानन्तरं गृहं गतवन्तः परन्तु उपकोसलस्य अपूर्णतां दृष्ट्वा गुरुः सत्यकामः तं न प्रत्यावर्त्तयति स्म । परिशेषे उपकोसलस्य उपास्यदेवैरग्निभिः स उपदिष्टः । अनन्तरं स गुरुणोपदिष्टः । अनेन दृश्यते यत् यस्य छात्रस्य यदा विद्या समाप्ता भवति तदैव तस्य गुरुकर्त्तृकं समावर्तनं भवति स्म ।

विभिन्नानां विद्यानां विश्लेषणपद्धतिरपि तत्र विस्मयमावहति । पञ्चाग्निविद्यायाः[22] व्याख्यावसरे परिलक्ष्यते प्रत्येकस्याग्नेः समिध् का ? धूमः कः ? ज्वाला कीदृशी ? अङ्गाराः के ? विस्फुलिङ्गाः के ? चेत्यादीनि वैज्ञानिकरीत्या वर्णितानि

[18] Indian Philosophy, Vol.-I , by S. Radhakrishnan, P. – 143
[19] छा. उ. ४.४-९
[20] भारत, भारतबोध, भारतसंस्कृति by आशा दास पृ. ३५, ३६
[21] छा. उ. ४.१०.१
[22] छा. उ. ५.४-९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ति । तत्र लोकरूपा पर्जन्यरूपा पृथिवीरूपा पुरुषरूपा स्त्रीरूपा चाग्निविद्याः सुसम्बद्धतया विश्लेषिताः । तत्र लोकरूपाग्निविद्याः विश्लेषणमित्थं प्रदर्श्यते[23] द्युलोक अग्निरस्ति । तस्य समिध् आदित्योऽस्ति । यतः आदित्येन हि असौ लोको दीप्यते । रश्मयो धूमस्तदुत्थानात्, अहरर्चिः प्रकाशसामान्यात् । चन्द्रमा अङ्गाराः अहः प्रशमेऽभिव्यक्तत्वात्, नक्षत्राणि विस्फुलिङ्गाः चन्द्रमसोऽवयवा इव विप्रकीर्णत्वसामान्यात् । अस्मिन्नेव प्रकरणे स्त्रीरूपा अग्निविद्या यथा विवृता तत्तत्र दृश्यते छान्दोग्योपनिषद ऋषिः गार्हस्थ्यजीवने या सामान्या वृत्तिः तामेव उच्चाध्यात्मिकसाधनानुकूल्येन जिज्ञासूनां समक्षं वर्णयति । अतो वक्तुं शक्यते अस्याः उपदेशपद्धतिः सामान्यजनोपयोगिनी अस्ति । उक्तं हि राधाकृष्णनेन[24] 'Their aim was not science or philosophy, but right living' इति । इयं पञ्चाग्निविद्या क्षत्रियराज्ञः प्रवाहणजैवलेः सकाशात् सर्वप्रथमं ब्राह्मणेन आरुणिना प्राप्ता । राज्ञा प्रवाहणेनोक्तम्- 'न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूत'[25] इति । अतो दृष्टं ब्राह्मणा अपि ब्राह्मणेतरेभ्यो विद्वज्जनेभ्यः उपदेशं गृह्णन्ति स्म ।

तद्वत् उद्दालक-आरुणिना सह प्राचीनशाल औपमन्यवः, सत्ययज्ञः पौलुषिः, इन्द्रद्युम्नो भाल्लवेयः, जनः शर्कराक्ष्यः, बुडिल आश्वतराश्विश्च पञ्च जिज्ञासवः क्षत्रियराज्ञः अश्वपतिकैकेयस्य सकाशं वैश्वानरात्मनः (वैश्वानरविद्यायाः) उपदेशप्राप्त्यर्थं गच्छन्ति स्म ।[26]

छान्दोग्योपनिषदि यस्य कीर्तिपताका दर्शनाकाशं स्पृशन्नस्ति येन च प्रयोजिता उपदेशपद्धतिः वैदिकभारतस्य आदर्शशिक्षापद्धतिरासीत् यस्योपदेशः दृष्टान्तमाध्यमेनैव प्रचारितः यश्च तत्त्वमसीति महावाक्यस्य स्रष्टा सोऽस्ति विश्वस्यादिमतमः प्राकृतिको वैज्ञानिक[27] उद्दालक आरुणिः । श्वेतकेतुः तस्यैव पुत्रः शिष्यश्च । उद्दालकः सम्भवतः

---

[23] छा. उ. ५.४. १(शाङ्करभाष्ये)

[24] Indian Philosophy, Vol.-I, by S. Radhakrishnan, P.-145

[25] छा. उ. ५.३.७

[26] छा. उ. ५.११

[27] History of Science and Technology in ancient India (2nd formation) by D.B. Chattopadhyaya P. 89

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथम आसीत् येन तत्पितृसकाशात् परम्परागता मधुविद्या[28] प्राप्ता । तद्वत् तेनापि तत्पुत्राय श्वेतकेतवे सद्विद्या[29] प्रोक्ता । द्वादशवर्षपर्यन्तं गुरुगृहे उषित्वा वेदाध्ययनं समाप्य गृहागतं पुत्रम् उद्दालकः पृष्टवान् यत् स आदेशो गुरुणा प्रोक्तो न वा 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति' । पुत्रेणोक्तं न भगवन् । तदा पित्रा उद्दालकेनोक्तम् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' । तत् सत् एकतः बहु भवितुमिच्छितवान् । तेन तेजसः उत्पत्तिर्जाता । तत्तेजो बहु स्यामिति भावनया अपोऽसृजत । 'ता आप ऐक्षन्त बहृव्यः स्यामः' इति तदा अन्नमसृजन्त । तदा सत्स्वरूपेण देवेन तेजोऽबन्नरूपेषु देवेषु जीवरूपेणानुप्रविश्य एकैकं त्रिवृतं त्रिवृतं व्याकृतम् ।अन्नजलतेजसामपि त्रेधा विभाजनं कृत्वा उद्दालकेन पुत्राय प्रोक्तम्-अन्नमयं मनः, आपोमयः प्राणः, तेजोमयी वागिति । षोडशकलपुरुषदृष्टान्तेन च पुत्राय अस्य तात्पर्यं (मनस अन्नमयत्वं प्राणस्य जलमयत्वं वाचश्च तेजोमयत्वं) प्रतिबोधितं पित्रा । सद्बुद्धि सुखाद्यत एव प्राप्यते इति चिन्तनं महत्त्वपूर्णमस्ति ।

एवं क्रमेण सूत्रबद्धशकुनिदृष्टान्तेन सुषुप्तिकाले जीवस्य स्थितिर्वर्णिता । मधुमक्षिका दृष्टान्तेन नदीदृष्टान्तेन च सुषुप्त्यवस्थायां सत्प्राप्तेर्ज्ञानं कथं न भवति इति चित्रितम् । वृक्षदृष्टान्तेन जीवस्य अविनाशित्वं प्रदर्शितम् । न्यग्रोधबीजदृष्टान्तेन सूक्ष्मात् स्थूलस्योत्पत्तिः प्रतिपादिता । लवणदृष्टान्तेन विद्यमानमपि वस्तु कथं न दृश्यते तदाख्यातम् । गान्धारपुरुषदृष्टान्तेन सत्प्राप्तेरुपायः उदीरितः । मुमूर्षुपुरुषदृष्टान्तेन मरणानन्तरं जीवस्य सत्प्राप्तेः क्रमो निर्देशितः । तप्तपरशुग्रहणोदाहरणेन जीवस्य पुनरागमनं कथं भवति तदाम्नातम् ।[30]

एतेन उद्दालकस्य यौक्तिकता प्रश्नोत्तरमाध्यमेन छात्रमनसि जिज्ञासोत्पादिका विश्लेषणकला तस्य विद्यावत्वञ्च परिस्फुटम् । येन स विशिष्टचिन्तकरूपेण युक्तिवादिप्राकृतिकवैज्ञानिकरूपेण च तदानीन्तनभारतवर्षे ख्यात आसीत्, यथोक्तम्[31] – 'The real contribution of a remarkable thinker called Uddālaka Āruṇi, whose long discourse we read in Chhāndogya Upaniṣad.

---

[28] छा. उ. ३.११.४
[29] छा.उ. षष्ठोऽध्यायः
[30] छा. उ. ६.७ तः ६.१६ पर्यन्तम्
[31] History of Science and Technology in ancient India (2nd formation) by D.B. Chattopadhyaya P. 43

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Uddālaka Āruṇi did in fact boldly knock at the gates of natural science to be opened. This made him the first rational natural scientist in the history of the Indian subcontinent.....'

बृहदारण्यकोपनिषदो विख्यातो दार्शनिको याज्ञवल्क्योऽपि उद्दालकस्य शिष्य[32] एव । अस्य ऋषेः ज्ञानपिपासा अनुकरणीयास्ति । ब्राह्मणत्वाभिमानं विहाय क्षत्रियसकाशादपि अनेन ज्ञानं गृहीतम् ।[33] उद्दालकस्य प्रशंसा बहुशःकृता[34]

'.....Uddālaka as a life long student : one who was old in years, but never too old to learn. He was an earnest seeker of truth, and an intense lover of wisdom.'

छान्दोग्योपनिषदः सप्तमाध्याये नामतः आरभ्य भूमातत्त्वपर्यन्तं येन दार्शनिकी व्याख्या नारदाय उदीरिता सः नारदस्यापि गुरुरासीत् सनत्कुमारः । यत्र च नारदेन तत्समक्षं स्वाधीतानि शास्त्राणि विवृतानि, यानि च छान्दोग्योपनिषदुक्त-तात्कालिकपाठ्यक्रमरूपेण स्वीकृतानि । नारदेनाधीतानि शास्त्राणि नामैव केवलमिति सनत्कुमारतः श्रुत्वा नाम्नो भूयः किमस्तीति नारदस्य पृच्छायां यथा यथा सनत्कुमारेण उत्तरं प्रदत्तं तथा तथा नारदस्य जिज्ञासा वृद्धिं गता । तदा सनत्कुमारेण उत्तरोत्तरश्रेष्ठत्वं प्रतिपाद्य नारदस्योत्कण्ठा प्रशमिता, यथा - नाम्नः वाग् भूयसी , वाचो मनो भूयः, मनसः सङ्कल्पो भूयान्, सङ्कल्पाच्चित्तं भूयः, चित्ताद्ध्यानं भूयः, ध्यानाद् विज्ञानं भूयः, विज्ञानात् बलं भूयः,बलादन्नं भूयः, अन्नादापो भूयस्यः, अद्भ्यः तेजो भूयः, तेजसः आकाशो भूयान् , आकाशात् स्मरो भूयः, स्मरादाशा भूयसी, आशायाः प्राणो भूयानिति। प्राणो नातिक्राम्यते । प्राणं ब्रह्मत्वेन विज्ञाय यद्यपि नारदः आप्तकामो बभूव। परन्तु सनत्कुमारेण सत्यस्वरूपं भूमातत्त्वञ्चाधिकृत्य सत्यं विज्ञानं मति - श्रद्धा - निष्ठा - कृति - सुख - भूमानो विजिज्ञासितव्या इत्युक्त्वा सत्यादीनामुत्तरोत्तराणां पूर्व-पूर्व-हेतुत्वं व्याख्यातम् । परिशेषे भूम्नो महिमा तस्य फलञ्च एवं प्रतिपादितम्- 'यो वै भूमा तत्सुखं

---

[32] बृहदारण्यकोपनिषद् ६.३.७/ ६.५.३

[33] छा. उ. ५.३/ ५.११-१७

[34] B.M. Barua (from: History of Science and Technology in ancient India (2nd formation) by D.B. Chattopadhyaya P.-111)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाल्पे सुखमस्ति भूमैव सुखम्'[35] । अल्पस्य अधिकतृष्णाप्राबल्यात् नास्ति सुखम् । 'भूमा महन्निरतिशयं बह्विति पर्यायास्तत् सुखम्' । '..यत्र नान्यत् पश्यति नान्यच्छ्रृणोति नान्यद्विजानाति स भूमा.....यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्'[36] इति । इह सोपानारोहणन्यायेन स्थूलादारभ्य सूक्ष्मं प्रत्यग्रसरपद्धतिः अनुसृता इत्युच्यते।[37]

छान्दोग्योपनिषदः अन्तिमे भागे[38] प्रजापतिसकाशं ब्रह्मविद्याधिगमनाय यौ द्वौ जिज्ञासू आगतौ तौ च चिरप्रतिद्वन्द्वी देवराज इन्द्र असुरराजो विरोचनश्च । यत्र च भोगसर्वस्वाभिमानी विरोचनः स्थूलदेहं ब्रह्म इति मत्वा गतः । इन्द्रस्तु बहुकालपर्यन्तं ब्रह्मचर्यपालनपूर्वकं प्रजापतिसन्निधौ अवस्थाय ब्रह्मज्ञोऽभूत् । इह प्रजापतिना इन्द्रविरोचनाभ्याम् आत्मज्ञानप्रदानपद्धतिः तदर्थपद्धतिः (The ad hoc or temporising method)[39] इति रूपेण स्वीकृता । तत्रैव अष्टमाध्यायस्य प्रारम्भे चर्चिता दहरविद्यायाः व्याख्यानशैली क्रमवृद्धिपद्धतिः[40] (Progressive method) रूपेण विद्वद्भिः सञ्जिता । तत्र दहरविद्या[41] एवमुपवर्णिता - शरीरमिदं ब्रह्मपुरम् तत्र पद्मपुष्पसदृशं गृहमस्ति हृदयगुहा । तत्रैवास्ति अन्तराकाशः । तस्मिन्नेव द्यावापृथिवी, अग्निर्वायुः, सूर्याचन्द्रमसौ, विद्युन्नक्षत्राणि, भूतं भव्यं सर्वञ्च समाहितमस्ति । तथापि अस्य देहस्य विनाशे सत्यपि तस्य ब्रह्मणः विनाशो न भवति । यतः 'एतत्सत्यं ब्रह्मपुरम् एष आत्मापहतपाप्मा' जरारहितो मृत्युहीनः शोकरहितः ,सत्यकामः सत्यसङ्कल्पोऽस्ति। अस्मिन्नेव लोके तत् सत्यमात्मानं ज्ञात्वा परलोको गम्यते चेत् तस्य गन्तुः सर्वेषु लोकेषु सार्वभौमस्य राज्ञ इव स्वेच्छा गतिर्भवति । एवं क्रमेण परमार्थसत्यं प्रति मन्दधियः क्रमशः उन्मुखीकृताः ।

---

[35] छा. उ. ७.२३.१

[36] छा. उ. ७.२४.१

[37] तुलनीय, Philosophy of Education in the Upanisads, by Jogeshwar Sharmah, P.P. 187-191

[38] छा. उ. ८.७.२

[39] A constructive survey of Upanishadic Philosophy (by R.D. Ranadey) P.P. 23-28

[40] तुलनीय, Philosophy of Education in the Upanisads, by Jogeshwar Sharmah, P. 193

[41] छा. उ. ८.१-२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषदः वेदानां सारग्रन्थाः । तत्र छान्दोग्योपनिषद् तात्कालिकचिन्तकानां चिन्तनचैत्यम् । अस्याः उपासनाः विद्याः आख्यानानि दृष्टान्तानि च व्यवहारिकजीवने अनुकूलानीति मन्यन्ते । सत्यान्वेषणार्थं जिज्ञासोर्जिज्ञासाप्रशमनार्थञ्च या विधिः शैली वा इह प्रयुक्ता ता अद्यापि ह्यनुकरणीया विज्ञानसम्मता च । इह प्रयुक्ता प्रतिलोमपद्धतिः पर्यवेक्षणपद्धतिः क्रमवृद्धिपद्धतिश्च कक्षायां प्रवचनक्षेत्रे प्रयोक्तव्या, येन छात्राणां कृते आचार्यस्य तत्त्वसमृद्धं व्याख्यानं सुखगम्यं भवितुमर्हति । व्याख्याने आख्यानप्रयोगेन छात्राणां मनसि अध्ययनस्पृहा जायते; यच्च छान्दोग्ये दृश्यते । तत्र श्वेतकेतु - नारद - इन्द्रादीनामुत्कण्ठा पुनः पुनः जागरिता । रैक्वशाण्डिल्यहारिद्रुमतगौतमाश्वपत्युद्दालकस-नत्कुमारसदृशानां छान्दोग्योक्ततत्त्वद्रष्टृणां कारणादेव मनूक्तवचनमिदं प्रासङ्गिकम्- 'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः, स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः' इति शम् ।

DR. SHANTI POKHREL
Reader, Deptt. of Sanskrit
Assam University, Silchar

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 21
जनवरी-जून 2013

वेदविद्या
ISSN-2230-8962

वेदे नाट्यशास्त्रस्त्रोतांसि

डॉ. चिरञ्जीवी शर्मा

वेदः सर्वज्ञानविज्ञानराशिः । तत्र सर्वज्ञानं ब्रह्मविषयकविचारस्य सत्वाद् विज्ञानं च शास्त्रशिल्पादिविषयेऽपि विचारस्य सत्वाद् वर्तते । तत एव विविधशास्त्रणि प्रादुर्भवन्ति। वेदे यानि संवादात्मकादीनि विवरणानि लभ्यन्ते तानीत्थं प्रस्तोतुं शक्यन्ते -

संवादसूक्तानि

'जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि' इति भरतनाट्यशास्त्रम् । वेदेभ्यः यान् विषयान् सङ्गृह्य नाट्यं रचितं तेष्वन्यतमः पाठ्यः (संवादः)। ऋग्वेदे अनेकानि संवादसूक्तानि लभ्यन्ते । तत्र यमयमीसंवादः[1], पुरूरवा-उर्वशीसंवादः[2], सरमापणिसंवादः[3] इत्यादीनि संवादसूक्तानि उल्लेखनीयानि ।

यमयमीसंवादः

यमी यमस्य स्वसा । सा तस्मिन् भ्रातरि आत्मनः कामवासनाजन्यप्रेम व्यञ्जयति । परन्तु यमः कथयति अस्मिन् लोके अहोरात्रादयः सर्वेषां शुभाशुभलक्षणकर्मप्रत्यवेक्षणार्थं परिभ्रमन्ति । यो भ्राता स्वसारम् उपगच्छति तं पापकारिणमाहुः । एतज्ज्ञात्वा हे यमि ! त्वं मत्तः अन्येन त्वद्योग्येन पुरुषेण सह प्रमुदः इति । यमः आदर्शवादी। सः स्वेच्छाचारितायाः निवारणं करोति । एवं संवादेऽस्मिन् यमः मर्यादिताचरणपरिचायकः ।

---

[1] ऋग्वेदः 10.10
[2] ऋग्वेदः 10.95
[3] ऋग्वेदः 10.130

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरूरवा - उर्वशीसंवादः

अनेन संवादेन पुरूरवसः उर्वश्याश्च चरित्रचित्रणं कृतम् । उर्वशी आत्मनिरीक्षणं कृत्वा कथयति -

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥[1]

अहं वात इव दुरापना अस्मि । अहं वायुरिव दुष्प्रापा दुरापा वास्मि इति तत्र सायणः । उर्वशी पुरूरवसं त्यक्त्वा गता । पुरूरवा उर्वश्याः वियोगे व्यथितो भवति ।

सरमापणिसंवादः

पणयः आर्याणां गाः चोरयित्वा कुत्रचिद् ध्वान्तगुहायाम् अगूहन् । इन्द्रस्य दूती सरमा ताः प्रत्याहर्तुं यतमाना पणिभिः सह संवादं करोति । सा आर्याणां पराक्रमगाथां गायति । पणीन् तर्जयित्वा बोधयति । क्रुद्धाः पणयः कथयन्ति - कुत्र गावः तिष्ठन्तीति ? परितो गच्छन्ती त्वमिमाः परिदृश्यमाना या गावः, ताः गाः त्वदीयः कः अयुद्ध्वा अस्मात् पर्वतादवसृजेत् ? अस्माकं तीक्ष्णानि आयुधानि सन्ति । तस्माद् अस्मामिः युद्धमकृत्वा को नाम गा आहरति ?

संवादः चरित्रचित्रणस्य परिवेशप्रस्तुतेश्च माध्यमम् । संवाद-योजनयैव नाटकस्य सफलं मञ्चनं कर्तुं शक्यते । संवादेषु अभिनेयतायाः तत्त्वानि स्वतः समाहितानि भवन्ति । एते पात्राणां सक्रियतायाः परिचायका भवन्ति । गतिशीलतैव अभिनेयतायाः प्राणतत्त्वं भवति ।

अभिनयः

वेदेभ्यः यान् विषयान् सङ्गृह्य नाट्यं रचितं तेष्वन्यतमः अभिनयः । अवस्थानुकरणम् अभिनयः । स चतुर्विधः । 1. आङ्गिकः (अङ्गेन निर्वृतः) 2. वाचिकः (वचसा निर्वृतः) 3. आहार्यः (आहर्तुं योग्यः वेषरचनादिनिष्पाद्यः) 4. सात्त्विकः (सत्त्वं स्वेदस्तम्भादि तेन निर्वृतः) । यजुर्वेदे आङ्गिकादि - अभिनयानां स्वरूपाणि दृश्यन्ते । क्वचिच्च एतेषां सम्मिलितस्वरूपाणि ।

---

[1] ऋग्वेदः 10.95.2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

1. आङ्गिकः

यथा - **'जनयत्यै त्वा संयौमि'**[1]

अपां पिष्टानां च मिश्रीकरणं संयवनम् । हे जलपिष्टरूप पदार्थद्वय, त्वां संयौमि सम्यङ्मिश्रीकरोमि । किमर्थम् ? जनयत्यै यजमानस्य प्रजोत्पादनार्थम्। जलपिष्टयोः यथा मिश्रणं तथा शुक्रशोणितमिश्रणेन यजमानस्य प्रजोत्पत्तिर्भवति तदर्थं त्वां संयौमीति तत्र महीधरः ।

यथा - **आच्याजानु दक्षिणतः**[2]

जान्वाच्य वामजानुं पातयित्वा तथा दक्षिणतो निषद्य दक्षिणाभिमुखम् उपविश्य एवं शारीरिकचेष्टानां निर्देशः आङ्गिकः ।

2. वाचिकः

यथा- **सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।**
इन्द्रस्य त्वा भाग ꣳ सोमेनातनच्मि विष्णो हव्यꣳरक्ष ॥[3]

दर्शयागे त्रीणि हवींषि सन्ति । 1. आग्नेयः अष्टाकपालः 2. ऐन्द्रं दधि 3. ऐन्द्रं पयः। तत्र प्रतिपादि दधि होतुं दध्नो निष्पत्यै रात्रौ अमावस्यायां गावो दोग्धव्याः । एकस्यां गवि दुग्धायां दोग्धारं प्रति अध्वर्युः पृच्छति - कामधुक्षः हे दोग्धः ! विद्यमानानां गवां मध्ये त्वं कां दुग्धवानसि ? अमूं गामिति दोग्ध्रा प्रोक्ते सति 'सा विश्वायुः' इति दोग्धारं प्रति अध्वर्युः कथयति । एवमत्र प्रश्नोत्तर वाचिकः ।

उपमानाधृतवाचिकः

यथा - **अग्ने तमद्याश्वन्नस्तोमैः क्रतुन्न भद्रꣳहृदि स्पृशम् ।**[4]

अत्र 'न' इति निपातः उपमार्थीयः । यथा स्तोमैः स्तुतिभिः अश्वमाश्वमेधिकं विप्राः समर्धयन्ति । यथा -

द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ॥
पूतम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥[1]

---

[1] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 1.22
[2] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 19.63
[3] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 1.4
[4] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 17.77

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रुस्तरुः तन्मयं पदं द्रुपदं पादुका तस्मान्मुमुचानः पृथक् भवन् यथा पादुकादोषैरसम्बद्धो भवति । यथा स्विन्नः स्वेदयुक्तः स्नातः सन् मलात् पृथग्भवति । आज्यमिव यथा पवित्रेण कम्बलमयेन पूतं गालितमाज्यं घृतं कीटेभ्यः पृथग्भवति । तथापो मां शुन्धन्तु इति तत्र महीधरः ।

3. आहार्यः

यथा - **नमं उष्णीषिणे गिरिचरायं**[2]

उष्णीषं शिरोवेष्टनमस्यास्तीति उष्णीषी शिरः प्रावृत्य ग्रामेऽपहर्तुं प्रवृत्तः ।

यथा - **नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च ।**
नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥[3]

खड्गयुताय, तूणयुताय, शोभनम् आयुधं त्रिशूलं यस्य स स्वायुधः तस्मै। शोभनं धनुः पिनाकं यस्य स सुधन्वा तस्मै नम इति रुद्रदेवनमस्करणे शिरोवेष्टन-आदि परिधाननिर्देशः आहार्यः ।

4. सात्विकः

यथा -

सा ह व्वाक्परोक्ता व्विसिष्मिये ।
तस्यै गर्भः पपात सा ह व्वाक्प्रजापति-
मुवाचाहव्यवाडेवाहं तुभ्यं भूयासं यां मा
परावोचऽइति तस्माद्यत्किञ्च प्राजापत्यं
यज्ञे क्रियतऽउपाश्ंश्चैव तत्क्रियतेऽहव्यवाड्ढि
व्वाक्प्रजापतयऽआसीत् ।[4]

प्रजापतिनोक्ते सा वाक् पराजितत्वेन 'उक्ता' विसिष्मिये विगतस्मया भग्नवीर्या बभूव । तस्मात् पराभवात् तस्या वाचो यो गर्भः देवमनुष्यादी-नामुत्पत्तिहेतुः सोऽपि पपात। सा वाक् पराजयेन खिन्न सती प्रजापतिम् उक्तवती । किमिति हे प्रजापते ! तुभ्यमहम् अहव्यवाड् हव्यवहनस्याहेतुभूतैव

[1] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 20.20
[2] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 16.22
[3] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 16.36
[4] शतपथब्राह्मणम् 1.4.5.12

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयासमिति तत्र सायणः । एवमत्र वाचः खिन्नता तज्जन्यगर्भपातप्रक्रिया स्वरस्यान्तर्गता, एवं सात्विकः । भयक्रोधादिभिः वाण्याः खण्डनं स्वरभङ्गः । भय-हर्ष-क्रोधादीनां कारणात् शरीरकम्पनं वेपथुः ।

गृहामा विभीतमावेपध्वमूर्जम्बिभ्रत एमसि ।[1]

वेपध्वमूर्जम् 'डुवेपृ कम्पने' वेपतिः कम्पनार्थः । कम्पनं मुञ्चत-उवटः । कम्पं मा कार्ष्ट - महीधरः ।

व्रेशीनां त्वा पत्मन्नाधूनोमि[2]

हे सोम ! व्रेशीनां व्रजतो मेघस्योदरे शेरते ता व्रेश्यः मेघोदरस्था आपः तासां पत्मन् पतने निमित्ते वृष्टिनिष्पत्यर्थं त्वामाधूनोमि कम्पयामि ।

गीतम्

वेदेभ्यः यान् विषयान् सङ्गृह्य नाट्यं रचितं तेष्वन्यतमं गीतम् । नाट्ये गीतप्रयोगस्य अत्यधिकं महत्त्वं वर्तते । गीतं श्रुत्वा मनः प्रसन्नं भवति । 'गीतिषु सामाख्या' इति जैमिनीसूत्रम् । 'सा' शब्दस्यार्थो भवति ऋक् अमशब्दस्यार्थोऽस्ति गान्धारादयः स्वराः । ऋचा सह सम्बद्धस्वरप्रधानगायनम्तया सह सम्बद्ध अमो नाम स्वरः यत्र वर्तते तत्साम । उद्गाता मन्त्रान् विविधस्वरेषु गायति । ऋक्साम्नोः प्रगाढमिदं पारस्परिकं सम्बन्धं सूचयितुं दम्पतीत्वमपि वर्णितमस्ति -

अमोहमस्मि सा त्वम् सामाहमस्मि ऋक्त्वम् द्यौरहं पृथिवी त्वम् ।
ताविह सं भवाव प्रजामा जनयावहै ॥[3]

सामरूपोऽहं पतिरस्मि त्वं च ऋग्रूपा पत्नी असि । अहमाकाशोऽस्मि त्वं च पृथिव्यसि । मिलित्वा प्रजोत्पादनं कुर्वः । एवं सामवेदः ऋगाश्रयभूतः गानमयः । गानं चतुर्धा भवति - 1. ग्राम वेयगानम् अस्य अपरं नामप्रकृतिगानम् 2. आरण्यगानम् 3. ऊहगानम् 4. ऊह्यगानम् । षट् सामविकारा भवन्ति । 1. विकारः यथा - अग्ने इत्यस्य ओग्नायि । 2. विश्लेषणं यथा 'वीतये' इत्यस्य 'बोयि तोया' 2 यि' इति । 3. विकर्षणम्

---

[1] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 3.41
[2] शुक्लयजुर्वेदमाध्यन्दिनसंहिता 8.48
[3] अथर्ववेदशौनकसंहिता 14.2.71

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा 'ये' इत्यस्य 'या २३ यि' इति 4. अभ्यासः यथा 'तोया २ यि' पदस्य वारद्वयमुच्चारणम्। 5. विरामः यथा 'गृणानो हव्यदातये' इत्यस्य गृणानोह । व्यदातये इति । गृणानोह इत्यस्य पदान्तत्वाभावेऽपि गानसौकर्यार्थं शब्दमध्ये एवं विरामः । 6. स्तोभः यथा 'औ' 'हौवा' 'हाउवा' इत्यादिगानानुकूलपदानि।

रसः

वेदेभ्यः यान् विषयान् सङ्गृह्य नाट्यं रचितं तेष्वन्यतमः रसः । अभिनयेन सामाजिकानां हृदि रसोद्रेक (उद्रेक - आधिक्य) करणं नाट्यम् ।

दम्पत्योः प्रेमपूर्णा पारस्परिकदृष्टिः

अक्ष्यौ नौ मधुसंकाशे अनीकं नौ समञ्जनम् ।
अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति ॥[1]

जाया पतिं प्रति पतिर्जायां प्रति स्वात्मानं माम् इति निर्दिशति । यथा तव अहं हृदयङ्गमा प्रिया भवामि तथा कुरु । आवयोः मनोऽपि समानम् एककार्यकारि भवतु इति तत्र सायणः ।

अभि त्वा मनुजातेन दधामि मम वाससा ।
यथासो मम केवलो नान्यासां कीर्तयाश्चन ॥[2]

स्वपतिं प्रति स्त्रिया वाक्यम् एतत् इति सायणः । हे पते ! त्वां मनुना मन्त्रेण जातेन मन्त्रपूर्वकं परिहितेन मनोर्वाजातेन निष्पन्नेन मम वस्त्रेण बध्नामि। किमर्थं बन्धनम् तद् आह - येन प्रकारेण मम केवलः असाधारणः भवेः । यथा च अन्यासां नारीणां नामधेयं नोच्चरेः । तथा बध्नामि । एवमत्र शृङ्गाररसः ।

अग्ने जातान् प्रणुदा मे सपत्नान् प्रत्यजातान् जातवेदो नुदस्व।
अधस्पदं कृणुष्व ये पृतन्यवोनागसस्ते वयमदितये स्याम ॥[3]

अस्मिन् मन्त्रे शत्रुहननार्थम् अग्नेः प्रार्थना । अत्र शत्रूणाम् अपसारणम् उत्साहः ।

---

[1] अथर्ववेदशौनकसंहिता 7.36.1

[2] अथर्ववेदशौनकसंहिता 7.36.2

[3] अथर्ववेदशौनकसंहिता 7.34.1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वायो यत्ते तपस्तेन तं प्रति तप ।
यो ३ स्मान् द्वेष्टि यं वयं द्विष्मः ॥[1]

अत्र यः द्वेषं करोति तस्य पीडनं क्रोधः ।

प्रतिदह यातुधानान् प्रतिदेव किमीदिनः ।
प्रतीचीः कृष्णवर्तने संदह यातुधान्यः ॥[2]

पुत्रादिहननानन्तरं राक्षस्यः परस्परताडनेन विकीर्णाः केशा यासां ताः विकेश्यः परस्परताडनेन म्रियन्ताम् । अत्र राक्षसीनां पारस्परिकसङ्घर्षे तासां विनाशोल्लेखः भयोत्पादकः ।

येन मृतं स्नपयन्ति श्मश्रूणि येनोन्दते।
तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ॥[3]

पापिनः दण्डविधानम् । तेन जलेन सः स्नाति येन मृतकं स्नपयन्ति, येन जलेन श्मश्रूणि उन्दते तं जलं सः प्राप्नोति ।

य आमं मांसमदन्ति पौरुषेयं च ये क्रविः ।
गर्भान् खादन्ति केशवास्तानितो नाशयामसि ॥[4]

ये पिशाचा अपक्वं मांसं भक्षयन्ति । ये च पुरुषमांसं भक्षयन्ति । ये च प्रकृष्टकेशाः गर्भान् मायारूपेण प्रविश्य खादन्ति । एवमत्र अपवित्रजलेन स्नानादि - उल्लेखात् जुगुप्सा ।

आपो यद् वः शोचिस्तेन तं प्रति शोचत ।
यो ३ स्मान् द्वेष्टि यं वयं द्विष्मः ॥[5]

यः शत्रुः अस्मान् द्वेष्टि । यं शत्रुं वयं द्विष्मः (अप्रियं कुर्मः) शौचिः - शोकजननसामर्थ्यम् । तेन शोचिषा तं प्रति शोकयुक्तं कुरु । एवमत्र शोकप्रदशक्त्या शोकाकुलकरणोल्लेखः शोकः ।

अरिष्टोहमरिष्टगुरायुष्मानसर्वपूरूषः ।

---

[1] अथर्ववेदशौनकसंहिता 2.20.1
[2] अथर्ववेदशौनकसंहिता 1.28.2
[3] अथर्ववेदशौनकसंहिता 5.19.14
[4] अथर्ववेदशौनकसंहिता 8.6.23
[5] अथर्ववेदशौनकसंहिता 2.23.4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तं मा॒यं व॑रु॒णो म॒णिः परि॑पातु दि॒शोदि॑शः ॥[1]

अत्र शान्तिकामना

एवं रीत्या ऋग्वेदाद्यनुसारेण संवादादीनि प्रस्तुतानि। संवादाः विभिन्नकथानकसम्बद्धाः सन्ति । कथानकानाम् आधारेण कस्याश्चित् नाट्यकृतेः संरचना भवति । कथावस्तु कथा वा नाटकस्य मुख्याधारः । पुरूरवसः उर्वश्याश्च कथानकं सङ्गृह्य भारतस्य अद्वितीयेन नाटककारेण कालिदासेन अस्य वैदिकाख्यानस्य अनेकसहस्रवर्षान्तरं ततोऽपि अधिकवर्षानन्तरं वा विक्रमोर्वशीयं नामकं त्रोटकं रचितमिति मैकडॉनलः । यजुर्वेदे याज्ञिकक्रियाणां प्राधान्यं वर्तते । क्रियासम्पादनार्थं विभिन्नशारीरिकचेष्टानाम् आवश्यकता भवति। एवं विभिन्न-अभिनयानाम् आद्याधारः यजुर्वेदः । अभिनये यत्परभावग्रहणं दृश्यते तत्प्रक्रिया आहार्याभिनये निष्पन्ना भवति । ततः तदनुरूपम् आङ्गिकचेष्टानां प्रदर्शनं भवति । ततः चरित्रानुकूलवस्त्राभरणानां धारणम् अन्यवस्तूनां च प्रदर्शनम् । अभिनेता मूलचरित्रस्य परिधाने रूपरेखायां च रङ्गमञ्चं प्रविशति । नाटकसमापनानन्तरमपि तच्चरित्रस्य प्रभावः उच्छिन्नतां न याति । नाट्यशास्त्रे वर्णितगीतितत्त्वस्य मूलाधारः सामवेदः । उत्तरज्ञानं प्रति पूर्वपूर्वज्ञानं कारणं भवति । न हि कारणं विना कार्यं भवितुमर्हति । अथर्ववेदे काव्यात्मकतायाः कारणं रूपकात्मिकतायाः आधारे नाट्यरसः लभ्यते । नाट्यं महानाट्यकारं (ब्रह्म) प्रति लक्षितत्वात् जीवननाट्यं ब्रह्मानन्दपर्यन्तं नयनं लक्ष्यम् ।

डॉ. चिरञ्जीवी शर्मा
प्र. प्राचार्यः
वेदभवन महाविद्यालयः शृङ्गेरीमठ
अलोपीबाग, इलाहाबाद

[1] अथर्ववेदशौनकसंहिता 10.3.10

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 21 वेदविद्या
जनवरी-जून 2013 ISSN-2230-8962

श्रौतयागेषु स्तोत्रप्रयोगवैशिष्ट्यम्

डॉ. विजयकुमारः शर्मा

'यज' देवपूजासङ्गतिकरणदानेषु इति धातोः घञ् (भावे) प्रत्यये कृते यागशब्दो निष्पद्यते । इज्यन्ते देवा यस्मिन्निति विग्रहेण यागो देवपूजनसाधनरूपा क्रियावगम्यते । तादृशी क्रिया द्विविधा श्रौती स्मार्ता च।

यथा - **श्रुतिःस्त्री वेद आम्नायः**०[1]

स्मृतिस्तु धर्मसंहिता०[2] अर्थात् श्रुत्या प्रतिपादितो यागः श्रौतयागः, स्मृत्या प्रतिपादितः स्मार्त इति। वेदप्रतिपादितयज्ञाः एकाहप्रभृतिसहस्र- संवत्सरपर्यन्ताः एकद्वित्रिचतुर्वेदसाध्याः सन्ति तत्र ब्राह्मणग्रन्थेषु। श्रौतयागाः ब्राह्मणग्रन्थेषु कल्पसूत्रेषु अर्थात् श्रौतसूत्रगृह्यसूत्रधर्मसूत्रशुल्बसूत्रेषु सविस्तृतं व्याख्याताः प्राप्यन्ते । **ताँश्च** यागान् ब्रह्मोद्गात्रृहोत्रध्वर्युगणाः यथाशास्त्रं सम्पादयन्ति । यथा कात्यायनश्रौतसूत्रे **वर्णितमस्ति-षोडशर्त्विजो- ब्रह्मोद्गा -तृहोत्रध्वर्युब्राह्मणाच्छसीप्रस्तोतृमैत्रावरुणप्रतिप्रस्थातृपोतृप्रतिहात्रच्छ**[3].....

तेषु चतुर्षु गणेषु चत्वार श्चत्वार ऋत्विजो निर्धारिताः सन्ति । तत्रोद्गातृगणानां कार्याणि निर्धारयन्ति सामवेदीयानि ब्राह्मणानि ।

तत्र चतुर्वेदसाध्याः सोमद्रव्यप्रधानाः सोमयागाः सविशेषं वर्णिताः सन्ति ।

चरुपुरोडाशादिभिस्तत्र तत्र विहितैर्द्रव्यविशेषैः क्रियमाणइष्टयः । पशोर्हृदयादिभिरङ्गैरनुष्ठीयमाना यागा पशुयागाः सोमाख्या लतामभिषुत्य ग्रहचमसादिषु तदर्थं विहितपात्रेषु तं रसं पूरयित्वा तत्तद्देवताभ्यो दानं सोमयाग इत्युच्यते।[4] यज्ञरूपदेहोऽध्वर्युणा यजुभिः सम्पाद्यते । होता बाह्वृच्यैः

---

[1] अमरकोषः 1.6.3
[2] अ.को. 1.6.6
[3] कात्यायनश्रौतसूत्रम् 7.1.7
[4] ताण्ड्यब्राह्मणभूमिका पृष्ठं - 8 (द्वितीये खण्डे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शस्त्रैः समलङ्करोति तं देहं, भूषयति पवमानादिस्तोत्रैरुद्गाता । ब्रह्मा सर्वविद्यः सर्वं पश्यति समाधत्ते च ।

सर्वत्र ज्योतिष्टोमस्य सर्वप्रकृतित्वं समाम्नायते । एतस्य चतसृषु संस्थास्वग्निष्टोमस्यैव सर्वप्रकृतित्वं समाम्नायते । एतस्य चतसृषु संस्थास्वग्निष्टोमस्यैव सर्वप्रकृतित्वमभ्यर्हितत्वाद् । **तस्य हि चतस्रः संस्थाः अग्निष्टोमः उक्थ्यः षोडशी अतिरात्रश्चेति ।**[1]

संस्थाशब्दः समाप्त्यवबोधकः । अतस्तत्तत्साम्ना समाप्यमानानां संस्थानां नाम्नामन्वर्थता, अग्निष्टोमः इति । **अग्निष्टोमश्च** सोमयागः । तत्र ग्रहशस्तोत्राणि समनुष्ठेयान्यङ्गानि भवन्ति । स चाग्निष्टोमो ज्योतिस्सञ्ज्ञकैः स्तोमैः द्वादशस्तोत्रैश्च सम्पाद्यते । तद्यथा –

त्रिवृदबहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भावः पवमानः एकविंशोग्निष्टोमः।[2]

सोमलतामभिषूय तत्तद्ग्रहेषु गृहीत्वा आहूतानां देवानां स्तुत्यै स्तोत्राणि प्रददाति सामवेदः । श्रौतयागेषु प्रयुक्तानि स्तोत्राणि दशरात्र-संवत्सरैकाहीनस्त्रप्रायश्चित्तक्षुद्रपर्वात्मके ऊहोह्यगाने चतुःशतसूक्तेषु गीतानि सन्ति[3] तेषामेवोह्यगानानामध्ययनं लक्षणग्रन्थदिशा करोति पुष्पसूत्रं सामप्राति-शाख्येष्वन्यतमं ग्रन्थरत्नम् । **ताण्ड्यब्राह्मणमवलम्ब्य श्रौतयागेषु स्तोत्राणि क्लृप्तानि सन्ति, तत्र तदनुरूपञ्च पर्वणां वर्गीकरणम् ।**[4] परन्तु ताण्ड्ये प्रथमं संवत्सरसाध्यो गवामयनाख्यो यागः समह्यते, स च द्वादशाहयागस्य विकृतिभूतोऽस्ति । तत एव सर्वप्रकृतिभूतोऽग्निष्टोमस्ताण्ड्ये कथं सङ्गच्छते क्रमः ? इत्यत्र द्वादशाहस्य बहुभिर्दशभिरहोभिः सम्पन्नं भवति गवामयनस्तत्र प्रथमोत्तमेऽहनी ज्योतिष्टोमस्याग्निष्टोमातिरात्रसंस्थाके भवतः ।[5] अतः प्रथमे

---

[1] का.श्रौ.सू.भू.पृ. 43

[2] तां.ब्रा. – 20/1/1

[3] ता. ब्रा. भू. पृ. 33 (द्वितीयखण्डे)

[4] ऊहगानऊह्यगानभूमिका पृष्ठ – 41

[5] तत्रैव (345-346)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशरात्रपर्वणि गवामयन प्रकृतिभूतस्य द्वादशाहयागस्य प्रथमदिनसाध्याग्निष्टोमस्य स्तोत्राणि क्लृप्तानि सन्ति । अतो गवामयननिरूपणेन द्वादशाहस्य सर्वप्रकृतिभूतस्याग्निष्टोमस्य च क्लृप्तिस्ताण्ड्ये प्राप्यते । तेनाहं सर्वप्रथम-मग्निष्टोमयागसम्बद्धस्तोत्रप्रयोगवैशिष्ट्यमितिकर्तव्यतात्मकं किमपि टिप्पण्या-दियुतं प्रस्तौमि।

दीक्षणीयाद्युदवसानीयाष्विष्टिषु सुत्यादिवसे च बहूनि स्तोत्राणि गीयन्ते । प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानमिति लक्षणेन द्वयोः प्रकृतिगान-ऊहोह्यागानयोश्च (तत्र पठितानां सामगानानामिति यावत्) स्तोत्रत्वं सम्पद्यते तल्लक्षणलक्षितत्वाद् । एकाहसाध्येऽग्निष्टोमे दीक्षणीयादीष्टयोऽङ्गभूतानि । **सर्वत्रानादेशे प्रस्तोता परिसामानि गायेत्स्वाध्यायावत्स्वासु**[1] अर्थात् तास्विष्टिषु गेयानि परिसामानि यथाध्ययनं प्रस्तोत्रा गेयानि ऊहोह्यपठितगानानि (स्तोत्राणि) तु स्वां स्वां भक्तिमनुसृत्य त्रिभिः प्रस्तोत्रुद्गातृप्रतिहर्तृभिः ! यथा **ते स्वां स्वां भक्तिमनुच्छ्वसन्तो ब्रूयुः ।**[2] उच्छ्वसनन्तु पदेऽथवा स्तोभे कुर्युर्यदि नाशक्येत् पदस्तोभयोर्मध्ये नैव कार्यमिति नियमः स्तोत्राणां सन्धिवद्गानस्योत पदवद्गानस्य । यथा द्राह्यायणे प्रतिपादितमस्ति **पदे वोच्छ्वसेयुस्तोभे वा, नान्तरेण पदस्तोभौ ।**[3] अर्थात् अनेकपर्वात्मका भक्तयः (प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनानि) पृथक् पृथक् पदवद् वा गेयाः सन्धिवद्वेति व्यवस्था । अनुच्छ्वासं यथा भवति तथा गानं कर्तव्यं प्रथमम् । तथा यदि न शक्येत् पदे-पदेच्छ्वसनं कर्त्तव्यम् । द्वयोः पदयोर्विजातीयस्तोभयो श्च मध्ये नोच्छ्वसनम् ।[4] सति विकल्पे उपक्रमोपसंहारन्यायेन येन विधिना स्तोत्रोपक्रमः, समाप्तिश्च तेनैव विधिना । अर्थात् स्तोत्रोपाकरणं यदि पदवद्गानेन स्तोत्रपर्यवसानमपि तेनैव । एवं सन्धिवद्गानस्यापि ज्ञेयम् । प्रथमं पदवद्गीत्वा मध्ये सन्धिवद् पुनश्च पदवद् इति व्यत्ययो न कार्यः ।

---

[1] लाट्यायनश्रौतसूत्रम् - 1/5/1
[2] द्राह्यायणश्रौतसूत्रम् - (344)
[3] तत्रैव
[4] द्रा.श्रौ.सू. 346 धन्विभाष्यस्य टिप्पण्याम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमुत्तरार्चिकगीतानां स्तोत्राणामिव परिसाम्नां न कुत्रापि भक्तिविनियोगः श्रुतः प्रयुक्तश्च ।

परिसामानिपरिच्छिन्नकर्त्तृकानि, परिगतालिङ्गानि वा सामानीत्यग्निस्वामिनः ।[1]

तत्सम्बद्धसूत्रव्याख्यानक्रमे महर्षि धन्वी लिखति -

'यानि बहिस्तोत्रमङ्गतया प्रयुज्यते तानि परिसामानीति ।'[2]

अतः स्तोत्रादतिरिक्तं बहिस्तोत्रमिति कृत्वा परिसाम्नां स्तोत्रातिरिक्तत्वं ज्ञापयति धन्वी स्वकीये भाष्ये । विचारोऽयमनुमीयते विश्लेषणेनानेन । अन्यथा भक्तिविभागानुसारं सन्धिवद् वा पदवद्गानस्य धर्मणः (स्तोत्रस्य) परिसामस्वपि प्रयोगः स्यात् । श्रौतयागेषु स्तोत्रप्रयोगे सर्वस्तोत्राणां साधारणनियमाः विद्यन्ते । यथा-

1. **पुरस्तादुपरिष्टर्च्चः सर्वत्र जपेयुः यासु करिष्यन्तः स्युः**[3]

अर्थात् - सर्वत्र स्तोत्रप्रयोगात्पूर्वं पश्चाच्च साम्नामाधारभूतानामृचां पाठः करणीयो भवति ।

2. सप्तसुभक्तिष्वन्यतमा हिङ्कृतिः । **प्रयोगकाले साम्नामादौ हिङ्कारः कर्तव्यः**[4]

सा च साम्नामादौ सर्वैः शुनामाकृतौ समुपविश्य गीयते बहिष्पवमाने सकृत् **सकृद्धिङ्कृत्य बहिष्पवमानेन स्तुवीरन्।**[5] माध्यन्दिनार्भवयोः प्रतिसाम, **साम्ने साम्ने हिङ्कुर्युः** स्तोत्रान्तरेषु प्रतिपर्यायमिति ।

3. **स्तोष्यमाणानां मध्ये वैष्टुतं वसनं प्राक्समासं वोदक्समासं वा उपरिदशमास्तीर्य प्रस्तोता कुशा विद्धयाऽप्रस्तावान्तेषु ।**[6]

---

[1] ला.श्रौ.सू. 1/5/1 अग्निस्वामिभाष्ये ।

[2] द्रा.श्रौ.सू. 119 धन्विभाष्ये

[3] ला.श्रौ.सू. 1/9/12

[4] ऊहगा., ऊह्यगा., भू.पृ. 45

[5] द्रा.श्रौ.सू. 21

[6] ला.श्रौ.सू. 2/1/4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थात् स्तोत्रगतसङ्ख्यापूरकाणां स्तोमानां सङ्ख्यागणनाय प्रस्तोता प्रस्तावान्ते वैष्टुवस्त्रोपरि उदुम्बरकाष्ठनिर्मितः । कुशाः निक्षिपति ।[1]

कुशास्वरूपं यथा –

प्रस्तोता तु कारयेद्यज्ञियस्य वृक्षस्य खदिरस्य दीर्घसत्रेष्वेके, प्रादेशमात्रीः प्रज्ञाताग्राः कारयित्वा गन्धैः प्रलिप्य सर्पिषा सत्रेष्वेके वैष्टुतेन वसनेन परिवेष्ट्य क्षौमशाणकार्पासानां केनचिदुपर्यौदुम्बर्या वासयेत् ।[2]

4. **'स्तुतमनुशंसति' इति श्रुत्या स्तोत्रानन्तरं शस्त्रं शंसनीयं भवति। एतदर्थं स्तोमस्य चरमस्तोत्रीयायाः प्रस्तावान्ते 'होतरेषा' इति शंसिष्यन्तं होतारं वाचयेत् प्रस्तोता ।**[3]

5. स्तोत्राधारभूतासु ऋक्षु सामसु च यथाध्ययनमेव स्वरः कार्यः, न त्वेकश्रुतिः, कात्यायनश्रौतसूत्रेण निषेधात् । यथा–

एकश्रुति दूरात्सम्बुद्धौ यज्ञकर्मणि, सुब्रह्मण्या-साम-जपन्यूङ्खयाजमानवर्जम् ।[4] अन्यत्र 'यज्ञकर्मण्यजपन्यूङ्खसामसु ।'[5]

अर्थात् जपादिव्यतिरिक्तानामेव एकश्रुतिरन्यत्र यथाध्ययनमेव स्वरमण्डलः

सप्तस्वरास्त्रयो ग्रामाः मूर्च्छनास्त्वेकविंशतिः ।
ताना एकोनपञ्चाशदित्येतत्स्वरमण्डलम् ॥[6]

युतैर्मध्यमवृत्या च स्वरः कार्यः न तु तान एकश्रुतिर्वा ।

प्रयोगार्थे तु मध्यमाम् [7] एकश्रुतेस्तु तानशब्देनाभिहितस्स च उदात्तादिस्वररहित एकश्रुतेरेव मन्त्राणां भवति । 'तानो वा नित्यत्वात्'[8]

न संहितास्वरे नापि ब्राह्मणस्वरो निर्धारितः ।[1]

---

[1] ला.श्रौ.सू. 2/6/4
[2] ला.श्रौ.सू. 2/6/1
[3] ऊहगा. ऊह्यगा. भू.पृ. 48
[4] का. श्रौ. सू. 1/8/19
[5] पारस्करस्मृतिः 1/2/34
[6] नारदीयशिक्षा 1/2/4
[7] तत्रैव 1/9/21
[8] का.श्रौ.सू. 1/8/18

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामसाहित्ये तु ''परस्परं स्वराणां तननात्ताना'' एकोनपञ्चाशद्भेदभिन्नाः समाख्याताः

विंशतिं मध्यमग्रामे षड्जग्रामे चतुर्दश ।
तानान् पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान् ॥[2]

6. स्तोत्रस्यान्यतमा भक्तिः ऊँकारः (प्रणवः) सा च प्रस्तावान्ते उद्गात्रा उद्गीथात्पूर्वं गीयते । **ऊँकारहिङ्काराभ्यां साप्तविध्यम्** ।[3] अनेन हिङ्कारः, प्रस्तावः, प्रणवः, उद्गीथः, उपद्रवः, निधनञ्चेति भक्तयो भवन्तीति क्रमः ।

7. प्रतिभक्तिं विरम्य विरम्य पुरुषभेदेन गीते स्तोत्रे मध्ये त्रुटयो जायन्ते । तन्न स्यादिति उपगातारः ऋत्विजां पश्चादुपविश्य 'हो' इत्यक्षरेण मन्द्रस्वरेण उपगायन्ति गाननैरन्तर्याय ।[4]

स्तोतारःसदोमण्डपस्थऔदम्बर्याः शाखायाः समीपे समुपविश्य समानमुखाः स्तोत्राणि गायन्ति ।

प्रत्यङ्मुखः प्रस्तोता, उदङ्मुख उद्गाता, धारयन्तः ।[5]

तत्र 'औदुम्बरीं स्पृष्ट्वा गायेदिति श्रुत्वा उदङ्मुख उद्गाता उद्गीथोपद्रवौ गायति तां स्थूणां स्पृशन् । प्रत्यङ्मुखः प्रस्तोताप्रस्तावं प्रयुङ्क्ते, प्रतिहारमाग्नेयाभिमुखः प्रतिहर्ता, सर्वे च निधनमुपयन्ति ।'

निधनं प्रत्यङ्गम्[6] तस्य सर्वे निधनमुपयन्ति[7] अन्ततो निधनसाम्यादन्तः सामिकानि निधनानि सम्प्रसारयन्ति ।[8] एतद्बीजात्सर्वे निधनमुपेयुः ।[9]

---

[1] तत्रैव विद्याधरगौड़कृतायां सरलवृत्तौ

[2] ना.शि. 1/2/8 भट्टशोभाकरविरचिताशिक्षाविवरणे ।

[3] पञ्चविधसूत्रम् 1/3

[4] ऊहगा. ऊह्यगा. भू. पृ. 44

[5] ला.श्रौ.सू. 1/11/19-23

[6] पं.वि.सू. 1/7/43

[7] द्रा.श्रौ.सू. 157

[8] संहितोपनिषद्ब्राह्मणम् 3/1

[9] द्रा.श्रौ.सू. 2/2/10

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातःसवननिरूपणक्रमे सवनञ्चाम्नातम् अस्ति ताण्ड्ये । **गायत्रं प्रातःसवनं त्रैष्टुभं माध्यन्दनं सवनं जागतं तृतीयं सवनम् ।**[1] अत्र ब्राह्मणकल्पसूत्रादिभिर्विहितेषु बहुषु स्तोत्रेषु गायत्र्यां छन्दसि गीतानि स्तोत्राणि प्रातःसवनस्य निर्धारितानि । प्रातःसवने बहिष्पवमानं चत्वार्याज्यानि चेति पञ्चस्तोत्राणि समाम्नातानि । तत्र 'उपास्मै गायता नरः' इति प्रतिपदा तृचारम्भः। प्रतिपद्यते प्रक्रम्यते स्तोत्रं ययार्चा सा ऋक् प्रतिपद्वाच्या । स्तोत्रस्यास्य गानं सदसो बहिरास्तावदेशे विहितमस्ति । **बहिष्पवमानं सर्पन्ति।**[2] **सर्पन्ति।**[2] बहिस्तुवन्ति।[3] एकेन साम्नापि नवस्तोत्रीयात्मकं त्रिवृत्स्तोमं सम्पादयितुं शक्यते, **एकं साम तृचे क्रियते स्तोत्रीयम्**[4] तथापि बहिष्पवमानमावृत्तिरहितं गेयमिति नियमत्वादनेकतृचविधानम् । अर्थात्प्रतितृचं गायत्रं गीत्वा स्तोमगतसङ्ख्याः सम्पाद्यन्ते । स्तोत्रेऽस्मिन् सकृद्धिङ्कारो विधीयते । अस्य प्रस्तावभक्तेरक्षरक्लृप्तिः प्रस्तुतास्ति सूत्रब्राह्मणाभ्याम् । **गायत्रेण पादेन प्रस्तावः सर्वत्र आद्यपात् प्रस्ताव ओङ्कारान्तः ।**[5]

अर्थाद् गायत्र्याः प्रथमेन पादेन आकारान्तो गीतिविशिष्टः प्रस्तावो निर्धार्यते । तथैव साममध्ये स्थितं 'हिम्आ' इति पदं प्रतिहारभक्तित्वेन विनियुक्तम् **हिङ्कारो गायत्रस्य प्रतिहारः ।**[6]

रेतस्याख्याः प्रथमस्तोत्रीयायाः प्रतिहाराभावाद् (हिङ्काराभावाद्) स्तोत्रच्युतितया यज्ञस्य साङ्गता उपन्यस्ते । **अहिङ्कृता प्रथमारेतस्या**[7] **न हिङ्कुर्यात्**[8] तन्निरसनाय प्रतिहारसामगानकाले प्रतिहर्ता मनसा हिङ्कारं ध्यायेदिति विहितम् । **यो वै गायत्रेणाप्रतिहतेनोद्गायतीति।**[9] अन्यासु

---

[1] तां. ब्रा. 7/4/6
[2] तत्रैव 6/7/9
[3] तत्रैव 6/8/11
[4] तां.ब्रा. भू.पृ. 2 (द्वितीय खण्डे)
[5] आर्षेयब्राह्मणम् 7/1/4
[6] तां.ब्रा. 7/1/4
[7] ला.श्रौ.सू. 1/11/8
[8] षड्विंशब्राह्मणम् 2/1/4
[9] तां.ब्रा. 7/1/4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयादिषु स्तोत्रीयासु ऋचामन्त्यं द्वयक्षरं शिष्ट्वा प्रतिहारं कुर्याद् इति प्रतिहारभक्तिं निर्धारयति।

ऊर्ध्वं रेतस्याया द्वयक्षरं शिष्ट्वा हिङ्कारं ब्रूयाद् ।[1]

अस्य गायत्रसाम्नः प्रतिहारभक्तिस्थं 'हिम् स्थि आ' इति पद स्तोभः। उपद्रवनिधनयोः स्थिते 'दायो' आ । इति द्वे पदे ऋगक्षरपठिते विकृतौ तु स्तोभपक्षे हि पदानामेतेषां स्तोभस्यातिदेशः कर्तव्यः ।

हिम् आ वेत्यन्तस्तोभो वृद्ध वा[2] ब्राह्मणोक्तो 'वा' शब्दः स्तोभस्य वैकल्पिकप्रयोगमाख्याति । अर्थाद् विकृतौ स्तोभपक्षे हि स्तोभः प्रयुज्यतेऽन्यथा यथाम्नायं पदं तेषु पदेषु भवति । तत्र निधनभक्तौ प्रतिस्तोत्रीयं पृथक् पृथग् यज्ञानुरूपं निधनं समाचष्टे कल्पसूत्रम् । **प्रथमायां स्तोत्रीयायां सादिति निधनम् । द्वितीयायां सामिति, तृतीयायां सुवरिति, चतुर्थ्यामिडा, पञ्चम्यां वाक्, षष्ठ्यामाकार, सप्तम्यां पूर्ववद्गानप्रयुक्त आकारः, अष्टम्यामपि तदेव, उत्तमायाञ्च समानं निधनम् ।**[3] अस्या सर्वासु स्तोत्रीयासु उद्गीथोपद्रवभक्ती मनसा ध्यायन् उद्गाता तत्सदृशस्वरनिवेशनपूर्वकमोङ्कारं वाचा गायेत् ।

शेषमुद्गाता मनसा तु स्वभक्तिमोङ्कारं तथा स्वरं वाचा।[4] अप्रत्यक्षेण वर्णान्तरेण गीतमिदं गानमनिरुक्तत्वेन याज्ञिकसम्प्रदाये व्यवह्रियते। एतदेव धूर्गानं गायत्रस्य गीतिविकारभूतम् । सप्तम्यष्टम्योः स्तोत्रीययोः कल्पसूत्रस्य धूर्गानाभावात् तत्सवितुर्गायत्रवद्भावान्न विशेषः इत्युक्तिश्च तयोर्विकाराभावाद् गायत्रगानवत्वाच्चेति प्रवर्तिता प्रतीयते यतोहि प्रकृतस्य स्तोत्रस्य नवानामेव स्तोत्रीयाणां धूरभिधानान्मध्यपतितस्तयोरपि धूस्त्वमस्तीत्यत्र नास्ति शङ्कालेशः। अथ च प्रातःसवने विहितानि **'अग्न आयाहि'**[5]आनोमित्रावरुणा, आयाहिसुषुमा, आयाहिसुषुमा, 'इन्द्राग्नीआगतम्' इत्येतेषु चतुर्षु तृचेषु बहिष्पवमानवद् गायत्रेण

---

[1] द्रा. श्रौ. सू. 2011

[2] आ.ब्रा. 1/1/17 इत्यस्य सायणभाष्यम्

[3] आ.क. उपोद्घाते पृ. 28-29

[4] ला.श्रौ.सू. 7/10/20

[5] उत्तरर्चिके 660-671

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीतानि सामान्याज्यस्तोत्राणि । **यदाजि- मांस्तदाज्यानामाजात्वम्** ।[1]

माध्यन्दिनसवनम् -

सवनेऽस्मिन् माध्यन्दिनं पवमानं चत्वारि पृष्ठानि चेति पञ्चस्तोत्राणि प्रस्तुतानि सन्ति । तत्राद्ये 'उच्चातेपुनान प्रगाथ प्रतुद्र'[2] इति त्रिषु तृचेषु गायत्र - **पवमानोमुखं गायत्रम्** आमहीयव[3] - रौरव - यौधाजय - औशनानि पञ्चसामानि भवन्तीति छन्दः कथनपुरस्सरम् । पञ्चदशस्तोमसम्पाद्यमिदं स्तोत्रमूहोह्यपठितं तावत्स्तोत्रीयात्मकं वरीवर्ति । माध्यन्दिनार्भवयोः पवमानयोः प्रथमं साम यस्मिन् तृचे गीतं तस्मिन्नेव तृचे प्रथमं गायत्रमपि गेयं भवति । एवमस्य स्तोत्रस्याद्यतृचे गायत्रमामहीयवञ्च सामद्वयमेवमेवार्भवे तृतीयसवनपठितेऽपि वैशिष्ट्यं विहितम् । **एतावता वाव माध्यन्दिनं सवनं पुपुवे त्रिभिश्छन्दोभिःपञ्चभिश्च सामभिः** ।[4] अथ च होतृमैत्रावरुणब्रह्मसाम-अच्छावाकानां[5] पृष्ठसामत्वेन रथन्तरं[6] वा मदेव्यनौधसकालेयानि चत्वारि विहितानि । तत्र रथन्तरपृष्ठे विशेषविधिः प्रस्तूयतेऽत्र सेतिकर्तव्यतात्मकम्। प्रस्तोता होतृमैत्रावरुणधिरुण्यावन्तरेण निष्क्रम्यं आहवनीये पृष्ठहोमं जुहोति[7] रथन्तरं पिबतु प्रजापतये इदं न मम।[8] एवमाहुतिद्वयानन्तरं येन मार्गेण निष्क्रान्तस्तेनैव प्रत्यावर्त्य सदसि तिष्ठेत् ।[9] ततः तृचस्प जपं कुर्युः।[10]

---

[1] ताँ.ब्रा. 7/2/1
[2] उत्तरार्चिके 672-679
[3] तां. ब्रा. 7/3/7
[4] ऊहगानम् 1-4
[5] तां.ब्रा. 7/3/1-2
[6] आ.क. उपोद्घाते पृ. 41
[7] रहस्यगानं 1/1
[8] आ.क. उपोद्घाते पृ. 40
[9] ऊहगा. ऊह्यगा. भू.पृ. 47
[10] आ.क. उपोद्घाते पृ. 40 । ऊहगा. ऊह्यगा. भू.पृ. 47

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभित्वाशूरनोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्रतस्थुषः ॥
नत्वावाꣳ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥

ततोऽध्वर्युणा प्रदत्तं प्रस्तरं प्रस्तोता गृहीत्वा 'ब्रह्मन् स्तोयामः प्रशस्तः' इत्युद्गात्रे दद्यात् । तत ऐरं वै ऐडमित्यात्मकमुद्गाता मनसा ध्यायेत् । ततो 'यस्तोगोषुमहिमा' इति सर्वं जपित्वा दीक्षायै वर्णेन इति स्तोमयोगं पठेत् प्रस्तरेण जङ्घां स्पृशन् । ऋषिच्छन्दोदेवतादिकं स्मरन् स्तोत्रं गायेत् । अस्य वसिष्ठ ऋषिः ककुबुत्तराबृहतीच्छन्दः इन्द्रो देवता, प्रजापतिरकामयत इत्यादिविधायक ब्राह्मणवाक्यं भकारात्मकस्तोभसहितं **रथन्तरेऽन्वक्षरं भकारान्**[1] गीतं स्तोत्रस्वरूपं यथा -

हिम् (त्रिवारं)[2] आभित्वाशूरनोनुमोवा (प्रस्तावः)

ऊँ आदुग्धाइवधेनवईशानमस्य जगतः ऊँ वाव[3] भभाभुभाभिभभेभभभीभाभभभभभ।[3] (एतावत्पर्यतं चक्षुः सम्मीलनम्) सुवाऽ२३र्दृशाम् (उद्गीथः) आइशानमा२३ऽइन्द्राऽ३[4] (प्रतिहारः) सूस्थूऽ२३४ षा ओवाऽ६ ।

हाउवा (उपद्रवः) अस् (निधनम्) इति प्रथमा स्तोत्रीया।

इशोवा (प्रस्तावः) ऊँ नामिन्द्रसुस्थुषोनत्वावाꣳ अन्यो दिवियः ऊँ वाक् भाभिभभुभुभोभभाभाभभोभिभिभिभो (चक्षुर्निमीलनम्) नपाऽ२३र्थिवाः (उद्गीथः) नजातोनाऽ२३जाऽ३ (प्रतिहारः)

1. पर्यायादिषु हिङ्कारेण स्तुवीरन् (औ.प.पृ. 45)
साम्नि साम्नि हिङ्कुर्युः । तां.ब्रा. 2/1/1 सायणभाष्ये
2. समुद्रमन्तर्धायोद्गायेद्वागित्यादेयम् । तां. ब्रा. 7/7/9
3. प्राक् प्रतिहारं चतुरक्षरं शिष्ट्वा । द्रा. श्रौ. सू. 6/16 (587)
रथन्तस्य स्तोभाः स्वरवन्तः प्रयोक्तव्याः सं.उ.ब्रा. 2/23
प्रस्तूयमाने सम्मीलेत् स्वर्दृशं प्रतिवीक्षेत । तां.ब्रा. 07/7/15

---

[1] उत्तरार्चिके 680-681
[2] सं.उ.ब्रा. 2/28

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्सर्वत्र प्रतिवीक्षेत् । द्रा. श्रौ. सू. (558)

4. **अन्यत्र गणगीतिभ्यः । पु.सू. 8/9/7**

प्रयोगे प्रतिस्तोत्रीयं अस्य निधनस्य प्रयोगः (आवृत्ति) औ.प.पृ. 90)

नाइष्याऽ२३४ता । ओवाऽ६ । हाउवा (उपद्रवः) अस् (निधनम्) इति द्वितीया स्तोत्रीया ।

नजोवा (प्रस्तावः) ऊँ तोनजनिष्यते अश्वायन्तोमघन्नि ऊँ वाक् भोभभिभभेभभाभभोभभभभि (चक्षुर्निमीलनम्) द्रवाऽ२३जिनाः (उद्गीथः) गव्यन्तस्त्वाऽ२३हाऽ३ (प्रतिहारः) वामाऽ२३४ हा ।

ओवाऽ६ । हाउवा (उपद्रवः) अस् (निधनम्)

एताः तिस्रः स्तोत्रीयाः समावृत्य स्तोमः (सप्तदश) सम्पाद्यते । रथन्तरेण स्तुत्वा पुनस्तृचस्य जपः कार्यः ।

पुरस्तादुपरिष्टाच्चर्चः सर्वत्र जपेयुः यासु करिष्यन्तः स्युः।।[1]

ततश्च वरं चोदयेत् 'वरं मे देय' स्तुत्वा वरञ्चोदयेत् इति।[2]

यजमानवाचनं स्तोमविमोचनं स्तोमयोगञ्च क्रमशः कार्यम्

तत्राद्यन्तयोः स्तोत्रीययोः सङ्गच्छते स्वरहीनव्यञ्जनलोपप्रक्रिया न मध्यमायाम्। 'दिवियस्' इत्यत्र भिभिभो गीयते, परं 'भो' इत्यत्र 'भ' इत्येव भवितुमर्हति प्रथमस्तोत्रीयावद् ।

तृतीयसवनम् -

अत्र स्तोत्रद्वयमार्भवपवमानमग्निष्टोमश्चेति । आद्ये 'स्वादिष्ठया'[3] इति तृचे गायत्रसंहिते सामनी, पवस्वेन्द्रमच्छ इत्यत्र सफपौष्कले, पुरोजितीति तृचे श्यावान्धीगवे, अभिप्रितृचे कावमिति चतुर्षु तृचेषूत्पन्नानि सप्तसामानि विहितानि तत्र तैः सामभिः सप्तदशस्तोमस्य पूरणीयत्वात्स्तोत्रीयाधिक्यं सञ्जायते, तेन स्तोमविरोधः तत्समाधानाय उष्णिक्ककुभोस्तृचयोरेकर्चकरणेन स्तोमः क्लृप्यते।

---

[1] ला.श्रौ.सू. 1/3/9 (82)

[2] द्रा.श्रौ.सू. 589

[3] उत्तरार्चिके 668-702

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णिक्ककुभोस्तृचैकर्चत्वमव्याघातेन ।[1] एवं गायत्रतृचयोः षट्स्तोत्रीयाः उष्णिह्येका, एका च ककुभि अनुष्टुभि षट्स्तोत्रीयाः जगत्यां तिस्र इति सप्तदश सम्पाद्य आर्भवपवमानं पर्यवस्यते ।

द्वितीयं प्रगाथोत्पन्नमेकविंशतिस्तोमसाध्यं यज्ञायज्ञीयंसाम । अन्य स्तोत्रस्य त्रिष्वेव पर्यायेषु प्रथमायाः स्तोत्रीयाया मध्यवर्ति-'हिम्माइ' पदोच्चारणकाले पत्नीमुद्गातावेक्षते । **यज्ञायज्ञीयस्य हिङ्कारं प्रति पत्नीमुग्दातेक्षेत**[2] तथैव प्रथमद्वितीयस्तोत्रीययोनिर्धनकाले पत्नेजिनीभिरद्भिः पत्नी (यजमानः) स्वदक्षिणमुरू किञ्चिदभिषिञ्चति तृतीयान्ते सर्वेण तदुकेनेति **दक्षिणानुरूनभिषिञ्चति दक्षिणतो हि रेतः सिच्यते ।**[3] अत्र येन्यिधीतं 'गाइरागिरा' इत्यत्र 'आइराइरा' विधत्ते ब्राह्मणम् । **ऐरं कृत्वोद्गेयम्**[4] ऊहेऽपि तथैव पाठोऽस्ति । अनेन मीमांसकानां पौरुषेयत्वमतं समर्थितं भवति । अथ चास्य स्तोत्रस्य प्रयोगकाले स्तोतारः प्रावृतशिरस्का उपविशन्तीति विशेषः । **प्रावृतेनोद्गेयम् ।**[5]

डॉ. विजयकुमारः शर्मा
वेदविभागः, संस्कृतविद्या धर्म-विज्ञानसङ्कायः,
काशी हिन्दू विश्वविद्यालयः, वाराणसी

---

[1] द्रा.श्रौ.सू. 1542
[2] द्रा.श्रौ.सू. 608
[3] तां.ब्रा. 8/7/10
[4] तत्रैव 8/6/10
[5] तां.ब्रा. 8/7/6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्क 21
जनवरी-जून 2013

वेदविद्या
ISSN-2230-8962

वेद शब्द की इयत्ता एवं तात्पर्यार्थबोध

डॉ. रूप किशोर शास्त्री

सत्य-सनातन-वैदिकधर्म एवम् वैदिकसंस्कृति का मूल एवम् आधार- स्तम्भ वेद को विश्व का अत्यन्त प्राचीन एवम् आदिवाङ्मय माना गया है। मानवजाति के लौकिक एवं पारलौकिक अभ्युदय हेतु सर्गारम्भ में आदि ऋषियों के हृदय में नैसर्गिक-रूप से आविर्भूत एवं प्रकाशित (Revealed) होने के फलस्वरूप वेदज्ञान को अनादि, नित्य एवम् अपौरुषेय अर्थात् ईश्वरीय वाक् कहा गया है। इसीको लक्ष्य कर महर्षि मनु ने भक्तिभाव, ज्ञान, विवेकादि धर्म की जिज्ञासा रखने वालों के लिए इस वेद अथवा श्रुति को प्रमाणस्वरूप माना है।[1] भारतीय-मानस का एक सामान्य सा व्यक्ति जो दूरदराज के अञ्चल में रहता है, वह भी परस्पर विवाद होने पर प्रमाणस्वरूप वेद की ही दुहाई देते हुए कहता है कि यह कौन से वेद में लिखा है ? महाभारत-शान्तिपर्व में वेदों के माहात्म्य को व्यक्त करते हुए वेदवाक् को दिव्य, नित्य अनादिनिधना, सृष्टि के आदि में स्वयम्भू, परम कृपालु, परमात्मा ने प्रादुर्भूत किया और इसे ही समस्त धर्म, विधि आदि प्रवृत्तियों का जनक बताया है।[2]

भारतीयों के लिए वेद चरम सत्य है। यह सामान्य विद्या या ज्ञानमात्र नहीं, अपितु इह-परलौकिक समस्त ज्ञान के वाहक, दिग्दर्शक बोधक एवम् अखिल अर्थ के ज्ञापक हैं। इसलिए मनु की दृष्टि में यह **सर्वज्ञानमयो हि**

---

[1] धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः । मनुस्मृति 2/13

[2] अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।। महाभारत, शान्तिपर्व-233/24

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

